CC-0. In Public Domain. Digitization by eGangotri

॥ श्रीः ॥

हरिदास-संस्कृत-ग्रन्थमाला

७

2 Copy 7 11 47

॥ श्रीः ॥

श्रुतबोधः

परीक्षोपयोगि 'विमला' टीकासहितः ।

प्रकाशकः—

जयकृष्णदास-हरिदास गुप्तः—

चौखम्बा संस्कृत सीरिज आफिस,

बनारस सिटी।

१९४७

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

मध्यमा परीक्षोपयोगी सर्वोत्तम ग्रन्थः—

प्रबन्ध-पारिजातः

लेखकः—मुजफ्फरपुर राजकीय गवर्नमेण्ट संस्कृत कालेजाध्यापक व्या०वे०सा०आचार्य पं० रामचन्द्र मिश्र

इसमें मध्यमा परीक्षाके छात्रोंको संस्कृत प्रबन्ध रचना लिखने के नियम अत्यन्त सरल रूपमें समझाये गये हैं और तदनुसार परीक्षोपयोगी 'प्रबन्ध लेखनप्रकार' (परीक्षामें आने योग्य निबन्धों का उत्तर) इस तरह सरल और संक्षिप्त में लिखा गया है कि अभ्यास कर लेने पर भी विद्यार्थी परीक्षामेंपूरी सफलता प्राप्त कर सकते हैं। इतना ही नहीं अन्तमें (१)'पत्रलेखन प्रकार'(चिट्ठी-पत्री, आवेदन पत्र आदिका उल्लेख) तथा प्रसंगोपयुक्त (२) 'सुभाषितगद्यावली' (३)'सुभाषितपद्यांशावली' और (४)'लौकिक-न्यायमाला' आदि विषयोंका समावेश करके आधुनिक चतुरस्र विद्वान् बननेका सुगम रास्ता दिखाया गया है। विश्वास है कि आजतक के प्रकाशित प्रबन्धोपयोगी ग्रन्थोंमें इस 'प्रबन्धपारिजात' के समान दूसरी कोई भी पुस्तक नहीं है। शीघ्रता कीजिये कठिन परिस्थिति के कारण इसकी बहुत कम प्रतियाँ छपी हैं १=)

तर्कसंग्रहः

लक्षण-टिप्पणी-सहित 'इन्दुमती' भाषा टीका

प्रथमा परीक्षोपयोगी लक्षण टिप्पणी के साथ इन्दुमती नामक विस्तृत भाषा टीका सहित इस अभिनव संस्करण को देखकर आप अधिक प्रसन्न होंगे। प्रथमा परीक्षा में आने योग्य सभी प्रश्नोंके उत्तर आपको इस संस्करण में प्राप्त होंगे। ।=)

१- विज... पाठी। ... का। परी... ० श्रीकृष्णमणि... परीक्षोपयोगि... पाठः। सम्पा० श्री...

प्राप्तिस्थानम्—चौखम्बा संस्कृत पुस्तकालय, बनारस।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

THE
HARIDAS SANSKRIT SERIES
7.

SRUTABODHA OF KALIDAS

WITH

VIMALA SANSKRIT AND HINDI COMMENTARIES

by

Pt. Sri Kanaka Lal Thakura.

महाकवि श्रीकालिदासविरचितः

श्रुतबोधः

पं० श्रीकनकलाल ठक्कुरविरचित 'विमला' संस्कृत-
हिन्दीटीकाभ्यां समलंकृतः ।
पं० श्रीरामचन्द्र झा व्याकरणाचार्येण संशोधितः ।

PUBLISHED BY
JAYA KRISHNA DAS HARI DAS GUPTA
The Chowkhamba Sanskrit Series Office.
BENARES.

तृतीयावृत्तिः] पूरुष ।≦) [वं० २००१

All Rights Reserved by the Publishers.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

भूमिका ।

विदितमेवास्ति भवतां यत् महाकविश्रीकालिदासविरचितः श्रुतबोधनामा क्षुद्रच्छन्दोग्रन्थः कीदृशश्छन्दोज्ञानोपयोगीति । टीका अप्यस्य बह्वयः सन्ति । अथापि परीक्षार्थिनामस्युपयोगाय मयाऽपि समावेशितानेकच्छन्दोविषयप्रश्नस्यास्य परीक्षोपयोगि विमलानाम संस्कृतभाषाटीकाद्वयं निरमायि । एतच्च टीकाद्वयं परीक्षार्थिनाम्परीक्षायामत्युपयोगं विधास्यतीत्याशासे—

श्री कनकलालठक्कुरः ।

॥ श्रीः ॥

श्रुतबोधच्छन्दोग्रन्थश्लोकानामनुक्रमणिका ।

	श्लो.
अगुरुचतुष्कं	८
अक्षरं च नवमं	२१
अथ कुशोदरि	३०
आदिमध्यावसानेषु	३
आर्यापूर्वार्द्धसमं	५
आर्योत्तरार्द्धतुल्यं	६
आद्यचतुर्थं प्रथमं	७
आद्यिगतं तुर्यगतं	१२
आद्यचतुर्थमहीनं	२०
आख्यानकी स्यात्	२४
आद्यमक्षरमतः	२५
आद्यं चेत्रितयम०	३६
आद्यं द्वितीयमपि	३७
आद्याश्चेद्गुरवः	४२
उपेन्द्रवज्राचरणेषु	३३
चम्पकमाला यत्र	१६
चत्वारः प्राक्सुतनु	१८
चत्वारो यत्र वर्णाः	४१
छन्दसां लक्षणं	१
तुर्यं पञ्चमकं	९
तन्वि गुरु स्यादा०	१५
द्वितुर्यषष्ठमष्टमं	१३
द्वितीयमलिकुन्त	४१
पञ्चमं लघु सर्वत्र	११
प्रथमाचरमाधवृ०	३३
प्रथमगुरुषट्कं	१८
मन्दाक्रान्तान्त्यज	१९
यस्याः प्रथमे पादे	४
यस्यां त्रिषट्सप्त०	२२
यदीन्द्रवज्राचरणे	२२
यत्र द्वयोरप्यनयोः	२३
यदाद्यं चतुर्थं तना	२९
यदि तोटकस्य गु०	३१
यस्यामशोकाङ्कुर	३४
यस्यां प्रिये प्रथम	३५
यदा पूर्वो ह्रस्वः	४०
श्लोके षष्ठं गुरु	१०
ह्रस्वो वर्णो भाषते	१७
ह्रस्वो वर्णः स्याद	२७
संयुक्तात्परं दीर्घं	२
सर्वे वर्णा दीर्घा	१४
सप्ततीयकषष्ठ	२८
सुमुखि लघवः	३९

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

॥ श्रीः ॥

श्रुतबोधः

विमलाख्यया व्याख्यया समुद्भासितः ।

(१) ग्रन्थप्रतिज्ञा ।

छन्दसां लक्षणं येन श्रुतमात्रेण बुध्यते ॥
तमहं सम्प्रवक्ष्यामि श्रुतबोधमविस्तरम् ॥ १ ॥

अन्वयः—येन श्रुतमात्रेण छन्दसां लक्षणं बुध्यते । अहं अविस्तरं तं श्रुतबोधम् सम्प्रवक्ष्यामि ।

व्याख्या—येन ग्रन्थेन श्रुतमात्रेण श्रुतेनैव छन्दसां आर्या-ऽनुष्टुप्प्रभृतीनां लक्षणं चिन्हं (लघुगुरुवर्णमात्रास्वरूपं) बुध्यते ज्ञायते विद्वद्भिरिति शेषः । अहं कालिदासः अविस्तरं विस्ताररहितं तं प्रसिद्धं श्रुतबोधं श्रुतबोधनामानं ग्रन्थं सम्प्रवक्ष्यामि कथयिष्यामि।

समासः—श्रुत एव श्रुतमात्रः तेन । श्रुतेन बुध्यत इति श्रुत-बोधः तम् । अविद्यमानो विस्तरो यस्मिन् सोऽविस्तरः तम् ।

व्याकरणम्—श्रुतमात्रेण = श्रु × क्तः × मात्रच् । सम्प्रव-क्ष्यामि=सम् × प्र × ब्रू × लृट् ।

भाषा—जिस ग्रन्थ के सुनने ही से आर्या आदि छन्दोंका चिह्न जाना जाता है उस संक्षिप्त श्रुतबोधनाम ग्रन्थको मैं कहूंगा ॥ १ ॥

(२) परिभाषा ।

संयुक्ताद्यं दीर्घं सानुस्वारं विसर्गसम्मिश्रम् ।
विज्ञेयमक्षरं गुरु पादान्तस्थं विकल्पेन ॥ २ ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अन्वयः—संयुक्ताद्यं दीर्घं सानुस्वारं विसर्गसम्मिश्रम् अक्षं गुरु विज्ञेयम्। पादान्तस्थमक्षरं विकल्पेन गुरु विज्ञेयम्।

व्याख्या—संयुक्ताद्यं संयुक्तवर्णप्रथमं दीर्घं द्विमात्रिकं यथा (आ-ई-उ-ऋ) साऽनुस्वारम् अनुस्वारसहितं विसर्गसम्मिश्रं विसर्गयुक्तम् अक्षरं वर्णः गुरु गुरुसंज्ञकं (द्विमात्रिकं) विज्ञेयं बोध्यम्। पादान्तस्थं पादान्तवर्ति (अक्षरं) विकल्पेन पाक्षिकं गुरुसंज्ञकं (द्विमात्रिकं) विज्ञेयं बोध्यम्।

समासः—आदौ भवम् आद्यम्। संयुक्तस्य आद्यं संयुक्ताद्यम्। अनुस्वारेण सहितं सानुस्वारम्। विसर्गेण सम्मिश्रं विसर्गसम्मिश्रम्। पादस्य अन्तः पादान्तस्तत्र तिष्ठतीति पादान्तस्थम्।

व्याकरणम्—आद्यं आदिशब्दात् भवार्थे यत् (आदि × यत्) विज्ञेयम्=वि+ज्ञा+क्यप्।

भाषा—संयुक्तवर्णके आदिवर्ण द्विमात्रिकवर्ण, अनुस्वारयुक्तवर्ण, विसर्गयुक्तवर्ण को गुरु जानना। और पादके अन्तवर्ती वर्णको विकल्प से गुरु जानना॥ २॥

(३) गणलक्षणम्।

आदिमध्यावसानेषु भजसा यान्ति गौरवम्।
यरता लाघवं यान्ति मनौ तु गुरुलाघवम्॥ ३॥

अन्वयः—भजसा आदिमध्यावसानेषु गौरवं यान्ति। यरताः आदिमध्यावसानेषु लाघवं यान्ति। मनौ तु आदिमध्यावसानेषु गुरुलाघवं यातः।

व्याख्या—भजसा भगण जगण-सगणाः आदिमध्यावसानेषु प्रथममध्यान्तेषु (क्रमशः) गौरवं गुरुतां यान्ति प्राप्नुवन्ति। यरता यगण-रगण-तगणा आदिमध्यावसानेषु (क्रमशः) लाघवं लघुतां यान्ति गच्छन्ति। तु किन्तु मगण-नगणौ आदिमध्यावसानेषु सर्वत्र गुरुलाघवं गुरुत्वं लघुत्वं च यातः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

समासः—आदिश्च मध्यश्च अवसानं च आदिमध्यावसानानि तेषु । भश्च जश्च सश्च भजसाः । गुरोर्भावः गौरवम् । यश्च रश्च तश्च यरताः । मश्च नश्च मनौ । गुरुश्च लघुश्च गुरुलघू तयोर्भावः गुरुलाघवम् । एतस्यैव छन्दोमञ्जर्यां लक्षणान्तरमाह—

मध्यिगुरुस्त्वलघुश्च नकारो भादिगुरुः पुनरादिलघुर्यः ।
जो गुरुमध्यगतो रलमध्यः सोऽन्तगुरुः कथितोऽन्तलघुस्तः ॥

उदाहरणम्—

भगण	जगण	सगण	यगण
ऽ।।	।ऽ।	।।ऽ	।ऽऽ
रगण	तगण	मगण	नगण
ऽ।ऽ	ऽऽ।	ऽऽऽ	।।।

भाषा—भगण का प्रथम अक्षर गुरु होता है। जगण का मध्य अक्षर गुरु होता है। सगण का अन्त्य अक्षर गुरु होता है। यगण का आदि अक्षर लघु होता है। रगण का मध्य अक्षर लघु होता है। तगण का अन्त्य अक्षर लघु होता है। मगण के तीनों अक्षर गुरु होते हैं। नगणके तीनों अक्षर लघु होते हैं ॥ ३ ॥

(४) मात्राछन्दः प्रकरणम् ।

(आर्या १)

यस्याः प्रथमे पादे द्वादश मात्रास्तथा तृतीयेऽपि ।
अष्टादश द्वितीये चतुर्थके पञ्चदश सार्या ॥ ४ ॥

अन्वयः—यस्याः प्रथमे पादे तथा तृतीयेऽपि पादे द्वादश मात्राः (भवन्ति), द्वितीये पादे अष्टादश मात्रा भवन्ति, चतुर्थके पादे च पञ्चदश मात्राः भवन्ति सा आर्या भवति ।

व्याख्या—यस्याः वृत्तेः प्रथमे आद्ये पादे चरणे द्वादश

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

मात्रा भवन्ति तथा तृतीये पादेऽपि चरणेऽपि द्वादश मात्रा भवन्ति। द्वितीये पादे अष्टादश मात्रा भवन्ति। चतुर्थके चतुर्थे पादे पञ्चदश मात्रा भवन्ति। सा आर्या नाम वृत्तिः बोध्येति शेषः। आर्यायां पूर्वार्द्धे त्रिंशन्मात्राः परार्द्धे च सप्तविंशतिमात्रा भवन्तीति भावः।

समासः—द्वौ च दश च द्वादश। अष्ट च दश च 'अष्टादश। पञ्च च दश च पञ्चदश।

पिङ्गलोक्तलक्षणान्तरं यथा—

आदितृतीये द्वादश दशाष्टमात्रा द्वितीयचरणे च।
तुर्ये पञ्चदश स्युर्गाथेयं पिङ्गलेनोक्ता॥

उदाहरणं यथा—

सा जयति जगत्यार्या देवी दिवमुत्पतिष्णुरतिरुचिरा।
या दृश्यतेऽम्बरतले कंसवधोत्पातविद्युदिव॥

भाषा—जिस छन्दके प्रथम और तृतीयचरण में (१२) बारह मात्रा, और द्वितीय चरण में (१८) अठारह मात्रा और चतुर्थचरण में (१५) पन्द्रह मात्रा हों तो वह आर्या नाम छन्द है॥ ४॥

(२) गीतिः (आर्या)।

आर्यापूर्वार्धसमं द्वितीयमपि यत्र भवति हंसगते!।
छन्दोविदस्तदानीं गीतिं तामृतवाणि! भाषन्ते॥५॥

अन्वयः—हे हंसगते! यत्र द्वितीयमपि आर्यापूर्वार्द्धसमं भवति। हे अमृतवाणि। छन्दोविदः तदानीं तां गीतिं भाषन्ते।

व्याख्या—हे हंसगते हंसगामिनि! यत्र यस्मिन् वृत्ते द्वितीयम् उत्तरार्द्धमपि आर्यापूर्वार्धसमं आर्याप्रथमार्द्धतुल्यं भवति। हे अमृतवाणि सुधावचने! छन्दोविदः छन्दोशतारः (पण्डिताः) तां पूर्वोक्तलक्षणलक्षितां गीतिं तन्नाम्नीं (आर्यां) भाषन्ते कथयन्ति।

समासः—आर्यायाः पूर्वार्द्धं आर्यापूर्वार्द्धन्तेन समं आर्यापू-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

वार्द्धसमम् । हंसस्य गतिरिव गतिर्यस्याः सा हंसगतिस्तत्सम्बुद्धौ हे हंसगते । अमृतमिव वाणी यस्याः सा अमृतवाणी तत्सम्बुद्धौ हे अमृतवाणि । छन्दांसि विदन्तीति छन्दोविदः ।

व्याकरणम्—भवति = भू × लट् । भाषन्ते = भाष् × लट् ।

लक्षणान्तरं यथा—

आर्याप्रथमार्द्धसमं अपरार्द्धमाह तां गीतिम् ।

उदाहरणं यथा—

केशववंशीगीतिर्लोकमनोहरिणहारिणी जयति ।
गोपीमानग्रन्थेर्विमोचनी दिव्यगायनाश्चर्या ॥

भाषा—जिस छन्दके पूर्वार्द्ध और उत्तरार्द्ध दोनों आर्याके पूर्वार्द्ध के तुल्य हों उसे कवियोंने गीति नाम छन्द कहा है ॥ ९ ॥

(३) उपगीतिः (आर्या) ।

आर्योत्तरार्धतुल्यं प्रथमार्धमपि प्रयुक्तं चेत् ।
कामिनि ! तामुपगीतिं प्रकाशयन्ते महाकवयः ॥१०॥

अन्वयः—हे कामिनि ! प्रथमार्द्धम् अपि आर्योत्तरार्द्धतुल्यं प्रयुक्तं चेत् महाकवयः ताम् उपगीतिं प्रकाशयन्ते ।

व्याख्या—हे कामिनी रतिशीले ! (यत्र वृत्ते) प्रथमार्द्धम् पूर्वार्द्धम् अपि आर्योत्तरार्द्धतुल्यं आर्यापरार्द्धसदृशं प्रयुक्तं नियोजितं चेत् भवेत्, तदा महाकवयः काव्यकर्तारो विद्वांसः तां पूर्वोक्तलक्षणलक्षितां उपगीतिं तन्नाम्नीं वृत्तिं प्रकाशयन्ते कथयन्ति ।

समासः—आर्याया उत्तरार्द्धं आर्योत्तरार्द्धं तेन तुल्यम् । प्रथमं च तत् अर्धं च प्रथमार्द्धम् । कामोऽस्त्यस्याः कामिनी तत्सम्बुद्धौ हे कामिनि ! महान्तश्च ते कवयश्च महाकवयः ।

व्याकरणम्—प्रयुक्तं = प्र × युज् × क्तः । प्रकाशयन्ते=प्र × काश × णिच् × लट् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

लक्षणान्तरं यथा—

आर्याऽपरार्द्धतुल्ये दलद्वये प्राहुरुपगीतिम् ।

उदाहरणं यथा—

नवगोपसुन्दरीणां रासोल्लासे मुरारातिम् ।

अस्मार्यदुपगीतिः स्वर्गकुरङ्गीदृशां गीतेः ॥

भाषा—जिस छन्द के पूर्वार्द्ध और उत्तरार्द्ध दोनों ही आर्या के उत्तरार्द्ध के सदृश हों उसे महाकवियोंने उपगीति छन्द कहा है ॥६॥

(५) गणछन्दः प्रकरणम् ।

(४) अक्षरपङ्क्तिच्छन्दः ।

आद्यचतुर्थं पञ्चमकं चेत् ।

यत्र गुरु स्यात्साक्षरपङ्क्तिः ॥ ७ ॥

अन्वयः—यत्र आद्यचतुर्थं पञ्चमकं च गुरु स्यात् चेत् सा अक्षरपङ्क्तिः भवतीति शेषः ।

व्याख्या—यत्र यस्मिन् छन्दसि आद्यचतुर्थं प्रथमं तुर्यं च तथा पञ्चमकम् पञ्चममपि अक्षरं गुरु द्विमात्रिकं स्यात् चेत् सा पूर्वोक्तलक्षणलक्षिता अक्षरपङ्क्तिः भवतीति शेषः ।

समासः—आद्यं च चतुर्थं चानयोः समाहारः आद्यचतुर्थम्

व्याकरणम्—पञ्चमकम्=पञ्चन् × डट् मडागमः । स्यात्=अस् × लिङ् ।

लक्षणान्तरं यथा—

भगौ गिति पङ्क्तिः ।

यस्य वृत्तस्य पादः प्रत्येकं भगणेन गुरुद्वयेन च युक्तो भवेत् तत् पङ्क्तिर्नामवृत्तमित्यर्थः । इदमेव वृत्तं कालिदासेनाऽक्षरपङ्क्तिनाम्ना व्यवहृतम् ।

भ० गु० गु०

ऽ।। ऽ ऽ

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

उदाहरणं यथा—

कृष्णसनाथा तरणकपङ्क्तिः। यामुनकच्छे चारु च चार॥

भाषा—जिस छन्दका प्रथम चतुर्थ और पञ्चम अक्षर गुरु हों उसको अक्षरपङ्क्ति छन्द कहते हैं ॥ ७ ॥

(५) शशिवदनाछन्दः ।

अगुरु चतुष्कं भवति गुरू द्वौ ।
घनकुचयुग्मे ! शशिवदनासौ ॥ ८ ॥

अन्वयः—हेघनकुचयुग्मे ! यत्र चतुष्कम् अगुरु भवति द्वौ गुरू भवतः असौ शशिवदना ॥

व्याख्या—हे घनकुचयुग्मे निबिडस्तनद्वये ! यत्र यस्मिन् छन्दसि चतुष्कं प्रथमतो वर्णचतुष्टयम् अगुरु गुरुभिन्नं लघ्विति यावत् भवति, द्वौ वर्णौ गुरू दीर्घौ भवतः, असावेषा शशिवदना तन्नाम छन्दो बोध्यम् ॥

समासः—न गुरु अगुरु। कुचयोर्युग्मं कुचयुग्मं घनं कुचयुग्मं यस्याः सा घनकुचयुग्मा तत्सम्बुद्धौ हेघनकुचयुग्मे !

व्याकरणम्—चतुष्कम् = चतुर् × कन् × । भवति = भू × लट् ।

लक्षणान्तरं यथा—

शशिवदना न्यौ ।

यस्य प्रतिपादं नगण-यगणघटितं तद् शशिवदनानाम वृत्तम् ।

न० य०
⏜ ⏜
। । । । ऽ ऽ

उदाहरणं यथा—

शशिवदनानां व्रजतरुणीनाम् ।
अधरसुधोर्मि मधुरिपुरैच्छत् ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

भाषा—जिसके प्रथम से चार अक्षर-और पांचवां छठां अक्षर गुरु शवदना नाम छन्द कहते हैं ॥ ८ ॥

(६) मदलेखाछन्दः ।

तुर्यं पञ्चमकं चेद्यत्र स्याल्लघु बाले !
विद्वद्भिर्मृगनेत्रे प्रोक्ता सा मदलेखा ॥ ९ ॥

अन्वयः—हे बाले ! हे मृगनेत्रे ! यत्र तुर्यं पञ्चमकं लघु स्यात् चेत् सा इयं विद्वद्भिः मदलेखा प्रोक्ता ॥

व्याख्या—हे बाले अल्पवयस्के ! हे मृगनेत्रे हरिणाक्षि ! यत्र यस्मिन् छन्दसि तुर्यं चतुर्थं पञ्चमकं पञ्चमं च अक्षरं लघु ह्रस्वं स्यात् भवेत् चेत् यदि, तदा सा इयं विद्वद्भिः पण्डितैः मदलेखा प्रोक्ता कथिता ॥

समासः—मृगस्य नेत्रे इव नेत्रे यस्याः सा मृगनेत्रा तत्सम्बुद्धौ हे मृगनेत्रे ॥

व्याकरणम्—पञ्चमकं = पञ्चन् × कन् । स्यात् × अस् × लिङ् = । प्रोक्ता = प्र × वच् × क्तः + टाप् ।

लक्षणान्तरं यथा—

म्सौ गः स्यान्मदलेखा ।

म०	स०	गु०
ऽऽऽ	।।ऽ	ऽ

उदाहरणं यथा—

रङ्गे बाहुविरुग्णाद् दन्तीन्द्रान्मदलेखा ।
लग्नाऽभून्मुरशत्रौ कस्तूरीरसचर्चा ॥

भाषा -जिसके चतुर्थ और पञ्चम अक्षर लघु हों उसे पण्डितों ने मदलेखा कहा है ॥ ९ ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

(७) अष्टाक्षरजातौ (अनुष्टुब् छन्दः)।

श्लोके षष्ठं गुरु ज्ञेयं सर्वत्र लघु पञ्चमम्।
द्विचतुष्पादयोर्ह्रस्वं सप्तमं दीर्घमन्ययोः ॥१०॥

अन्वयः—श्लोके सर्वत्र पञ्चमं लघु षष्ठं च गुरु, द्विचतुष्पादयोः सप्तमं ह्रस्वं अन्ययोः सप्तमं दीर्घं ज्ञेयम्।

व्याख्या—श्लोकेऽनुष्टुबि सर्वत्र चतुर्षु पादेषु पञ्चमं पञ्चमाक्षरं लघु ह्रस्वं षष्ठं षष्ठाक्षरं गुरु दीर्घं, द्विचतुष्पादयोः द्वितीय—चतुर्थचरणयोः सप्तमं सप्तममक्षरं ह्रस्वं लघु—अन्ययोः प्रथमतृतीयचरणयोः सप्तममक्षरं दीर्घं विज्ञेयम्॥

समासः—द्वे च चत्वारश्चपादौ द्विचतुष्पादौ तयोः द्विचतुष्पादयोः।

व्याकरणम्—ज्ञेयम्=ज्ञा×क्यप्।

लक्षणान्तरं यथा--

पञ्चमं लघु सर्वत्र सप्तमं द्विचतुर्थयोः।
षष्ठं गुरुञ्च जानीयात् शेषेषु नियमो नहि॥

उदाहरणं यथा—

।ऽ ।ऽ।
रासकेलिसतृष्णस्य कृष्णस्य मधुवासरे।
।ऽ ।ऽ।
आसीद् गोपमृगाक्षीणां पथ्यावक्रमधुस्मृतिः॥

भाषा—जिस छन्दके चारो चरणों में पञ्चम अक्षर लघु षष्ठ अक्षर गुरु हो, और दूसरे चौथे चरणमें सप्तम अक्षर ह्रस्व हो, और प्रथम तथा तृतीय चरणमें सप्तम अक्षर दीर्घ हो उसको अनुष्टुट् छन्द कहते हैं

(८) पद्यछन्दोलक्षणम्।

पञ्चमं लघु सर्वत्र सप्तमं द्विचतुर्थयोः।
षष्ठं गुरु विजानीयादेतत्पद्यस्य लक्षणम् ॥११॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अन्वयः— यत्र सर्वत्र पञ्चमं लघु द्विचतुर्थयोः सप्तमं लघु षष्ठं च गुरु (भवेत्) एतत्पद्यस्य लक्षणं विजानीयात् ।

व्याख्या— (यत्र) यस्मिन् छन्दसि सर्वत्र चतुर्षु चरणेषु पञ्चमं पञ्चममक्षरं लघु ह्रस्वं, द्विचतुर्थयोः द्वितीय-तुर्ययोः पादयोः सप्तसंख्याकं अक्षरं लघु ह्रस्वं भवति, षष्ठं षष्ठाक्षरञ्च गुरु दीर्घं भवेत् , एतत् पद्यस्य पद्यनाम्नश्छन्दसः लक्षणं चिह्नं विजानीयात् बुध्येत ॥

समासः—द्वे च चतुर्थश्च द्विचतुर्थौ तयोः द्विचतुर्थयोः ।

व्याकरणम्—विजानीयात् = वि × ज्ञा × लिङ् ।

भाषा—जिस के चारो चरणों में पञ्चम अक्षर द्वितीय चतुर्थ चरण के सप्तम अक्षर लघु हों और षष्ठ अक्षर दीर्घ हो उसको (पद्य) छन्द कहते हैं ॥ ११ ॥

(६) माणवकाछन्दः ।

आदिगत तुर्यगतं पञ्चमकं चान्त्यगतम् ।
स्याद्गुरु चेत्तत्कथितं माणवकाक्रीडमिदम् ॥१२॥

अन्वयः—आदिगतं तुर्यगतं पञ्चमकम् अन्त्यगतं च गुरु स्यात् चेत् , तत् इदं माणवकाक्रीडं कथितम् ।

व्याख्या—आदिगतं प्रथमं तुर्यगतं चतुर्थं पञ्चमकं पञ्चमं अन्त्यगतं पादान्तवर्ति (अष्टममिति यावत्) गुरु दीर्घं स्यात् भवेत् चेत् यदि, तदा इदं एतत् माणवकाक्रीडं तन्नामकं वृत्तं कथितं अभिहितम् ।

समासः—आदिं गतम् आदिगतम् । तुर्यं गतं तुर्यगतम् । अन्त्यं गतम् अन्त्यगतम् ।

व्याकरणम्— स्यात् = अस् × लिङ् । कथितम्-कथ् × क्तः । लक्षणान्तरे यथा--

माणवकाक्रीडितकं भ्तौ लगौ । पिङ्गलः ।
भात्तलगौ माणवकम् । छन्दोमञ्जरी ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

भ०	त०	ल०	गु०
ऽ।।	ऽऽ।	।	ऽ

उदाहरणं यथा—

माणवकाक्रीडितकं यः कुरुते वृद्धवयाः।
हास्यमसौ याति जने भिक्षुरिव स्त्रीचपलः॥

भाषा—जिसके चारो चरणों में प्रथम-चतुर्थ-पञ्चम और अष्टम अक्षर गुरु हों वह माणवकाक्रीडनामकछन्द कहा गया है॥ १२॥

(१०) प्रमाणिका, (नगस्वरूपिणी) छन्दः।

द्वितुर्यषष्ठमष्टमं गुरु प्रयोजितं यदा।
तदा निवेदयन्ति तां बुधा नगस्वरूपिणीम्॥१३॥

अन्वयः—यदा द्वितुर्यषष्ठं अष्टमं च गुरु प्रयोजितं तदा बुधाः तां नगस्वरूपिणीं निवेदयन्ति।

व्याख्या—यदा यस्मिन् छन्दसि द्वितुर्यषष्ठं द्वितीयं तुर्यं चतुर्थं षष्ठं अष्टमं च अक्षरं गुरु दीर्घं प्रयोजितं प्रयुक्तं (भवेत्), तदा बुधाः पण्डिताः तां नगस्वरूपिणीं तन्नामकं छन्दः निवेदयन्ति कथयन्ति।

समासः—द्वे च तुर्यं च षष्ठं चैतेषां समाहारः द्वितुर्यषष्ठम्

व्याकरणम्—प्रयोजितम्=प्र×युज्×णिच्×क्तः। निवेदयन्ति=नि×विद्×णिच्×लट्।

छन्दान्तरे यथा—

लिगति प्रमाणी। पिङ्गलः।
प्रमाणिका जरौ लगौ। छन्दोमञ्जरी।

ज०	र०	ल०	गु०
।ऽ।	ऽ।ऽ	।	ऽ

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

उदाहरणं यथा—

मतल्लिका मचर्चिका प्रकाण्डमुद्धतल्लजौ ।
प्रशस्तवाचकान्यमून्ययः शुभावहो विधिः ॥

भाषा—जिसके प्रत्येकपाद में द्वितीय चतुर्थ-षष्ट-अष्टम अक्षर दीघ हों उसे पण्डितों ने नगस्वरूपिणी नाम का छन्द कहा है ॥ १३ ॥

(११) विद्युन्मालाछन्दः ।

सर्वे वर्णा दीर्घा यस्यां विश्रामः स्याद्वेदैर्वेदैः ।
विद्वद्वृन्दैर्वीणावाणि ! व्याख्याता सा विद्युन्माला।१४।

अन्वयः—हे वीणावाणि ! यस्यां सर्वे वर्णा दीर्घा (भवेयुः) (तथा) वेदैः वेदैः विश्रामः स्यात् सा विद्वद्वृन्दैः विद्युन्माला व्याख्याता ।

व्याख्या—हे वीणावाणि ! वीणावचने ! यस्यां वृत्तौ सर्वे वर्णाः समस्तान्यक्षराणि दीर्घाः गुरूणि भवेयुः, तथा वेदैर्वेदैः चतुश्चतुर्भिश्चतुर्भिरक्षरैः विश्रामो विरामः,स्यात् भवेत् , सा असौ विद्वद्वृन्दैः पण्डितगणैः विद्युन्माला तन्नामिका वृत्तिः व्याख्याता कथिता ।

समासः—वीणाया वाणीव वाणी यस्याः सा वीणावाणी तत्सम्बुद्धौ हे वीणावाणि ! विदुषां वृन्दाः विद्वद्वृन्दास्तैः ।

व्याकरणम्—विश्रामः = वि × श्रम् × घञ् । स्यात् = अस् × लिङ् । व्याख्याता = वि × आङ् × ख्या × क्तः × टाप् ॥

लक्षणान्तरे यथा—

विद्युन्माला मौ गौ । पिङ्गलः ।
मो मो गो गो विद्युन्माला । छन्दोमञ्जरी ।

म०	म०	गु०	गु०
ऽऽऽ	ऽऽऽ	ऽ	ऽ

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

उदाहरणं यथा—

वासो वल्गा विद्युन्माला वर्हश्रेणी शक्रश्चापः ।
यस्मिन् स स्तात् तापोच्छित्यै गोमध्यस्थः कृष्णाम्भोदः ।

भाषा—जिसके सब अक्षर दीर्घ हों और चार चार अक्षरों पर विश्राम हो उसको पण्डितगण विद्युन्माला छन्द कहते हैं ॥ १४ ॥

(१२) चम्पकमालाछन्दः ।

तन्वि ! गुरु स्यादाद्यचतुर्थं
पञ्चमषष्ठं चान्त्यमुपान्त्यम् ।
इन्द्रियबाणैर्यत्र विरामः
सा कथनीया चम्पकमाला ॥ १५ ॥

अन्वयः—हे तन्वि ! यत्र आद्यचतुर्थं पञ्चमषष्ठं अन्त्यम् उपान्त्यम् च गुरु स्यात , तथा इन्द्रियबाणैः विरामः च स्यात् सा चम्पकमाला कथनीया ॥

व्याख्या—हे तन्वि कृशाङ्गि ! यत्र यस्यां वृत्तौ आद्यचतुर्थं प्रथमतुर्यं पञ्चमषष्ठं पञ्चमं षष्ठम् अन्त्यं पादान्त्यं (दशममिति यावत्) उपान्त्यं नवमं च अक्षरं गुरु दीर्घं स्यात् भवेत् , तथा इन्द्रियबाणैः पञ्चभिः पञ्चभिः वर्णैः विरामः विश्रामः स्यात् , सा चम्पकमाला तन्नाम्नी वृत्तिः कथनीया अभिधेया ॥

समासः—आद्यं च चतुर्थं च अनयोः समाहारः आद्यचतुर्थम् । पञ्चमं च षष्ठं च अनयोः समाहारः पञ्चमषष्ठम् । उपान्ते भवम् उपान्त्यम् । इन्द्रियाणि च बाणाश्च इन्द्रियबाणास्तैः ।

व्याकरणम्—स्यात् = अस् × लिङ् । अन्त्यम = अन्त × यत् । उपान्त्यम् = उपान्त × यत् । विरामः = वि × रम् × घञ् । कथनीया = कथ × अनीयर् × टाप् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

लक्षणान्तरे यथा—

रुक्मवती भ्मा स्गौ । पिङ्गलः

रुक्मवती सा यत्र भमस्गाः ॥ छन्दोमञ्जरी ।

यत्र प्रतिपादं भगण-मगण-सगणेभ्यः परं एको गुरुः सा रुक्मवती नाम वृत्तिरित्यर्थः ।

भ	म	स	गु
ऽ । ।	ऽऽऽ	। । ऽ	ऽ

उदाहरणं यथा—

कायमनोवाक्यैः परिशुद्धैर्यस्य सदा कंसद्विषि भक्तिः ।

राज्यपदे हर्म्यालिरुदारा रुक्मवती विघ्नः खलु तस्य ॥

भाषा—हे कृशाङ्गि ! जिसके प्रथम चतुर्थ पञ्चम षष्ठ नवम, और दशम अक्षर गुरु हों, और पाँच पांच अक्षरों पर विश्राम हो वह चम्पकमाला नाम छन्द है ॥ १५ ॥

(१३) मणिबन्धछन्दः ।

चम्पकमाला यत्र भवेदन्त्यविहीना प्रेमनिधे ! ।

छन्दसि दक्षा ये कवयस्तन्मणिबन्धं ते ब्रुवते ॥१६॥

अन्वयः—हे प्रेमनिधे ! यत्र चम्पकमाला अन्त्यविहीना भवेत् , छन्दसि दक्षा ये कवयः ते तत् मणिबन्धं ब्रुवते ।

व्याख्या—यत्र यस्मिन् छन्दसि चम्पकमाला (छन्दः) अन्त्यविहीनाऽन्त्येन अक्षरेण विहीना रहिता भवेत् जायेत, अर्थात् प्रथमं चतुर्थं पञ्चमं षष्ठं नवमं च अक्षरं गुरु दीर्घं स्यात् पञ्चभिः चतुर्भिरक्षरैः विरामश्च स्यात् तदा छन्दसि छन्दःशास्त्रे दक्षा निपुणाः कवयः तत् वृत्तं मणिबन्धं नाम ब्रुवते वदन्ति ।

समासः—अन्त्येन विहीना अन्त्यविहीना । प्रेम्णो निधिः प्रेमनिधिस्तत्सम्बुद्धौ प्रेमनिधे ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

व्याकरणम्—अन्ते भवमन्त्यम् अन्तशब्दाद् भवार्थे यत् (अन्त × यत्)। ब्रुवते=ब्रू × लट्।

लक्षणान्तरं यथा—

स्यान्मणिमध्यं चेद्भमसाः। छन्दोमञ्जरी।

यत्र सर्वेषु पादेषु भगण-मगण-सगणा; सन्ति तत् म-णिमबन्धं नाम वृत्तमित्यर्थः।

भ०	म०	स०
ऽ।।	ऽऽऽ	।।ऽ

उदाहरणं यथा—

कालियभोगाभोगगतस्तन्मणिमध्यस्फीतरुचा।
चित्रपदाभो नन्दसुतश्चारु ननर्त स्मेरमुखः॥

भाषा—जिसके सब पादों में प्रथम-चतुर्थ-प्रञ्चम-षष्ठ और नवम अक्षर गुरु हों और पांच पांच तथा चार चार अक्षरों पर विश्राम हो उस छन्द को पिङ्गलाचार्यने मणिबन्ध नाम से कहा है॥१६॥

(१४) शालिनाछंदः।

ह्रस्वो वर्णो जायते यत्र षष्ठः
कम्बुग्रीवे! तद्वदेवाष्टमान्त्यः।
विश्रामः स्याच्चान्वि! वेदैस्तुरङ्गै-
स्तां भाषन्ते शालिनीं छान्दसीयाः॥१७॥

अन्वयः—हे कम्बुग्रीवे! हे तन्वि! यत्र षष्ठो वर्णो ह्रस्वो जायते तद्वदेव अष्टमान्त्यः अपि (ह्रस्वो जायते) वेदैः तुरङ्गैश्च विश्रामः स्यात् छान्दसीयाः तां शालिनीं भाषन्ते।

व्याख्या—हे कम्बुग्रीवे हे घटग्रीवे! हे तन्वि हे कृशाङ्गि! यत्र यस्मिन् छन्दसि षष्ठः षष्ठसंख्यकः वर्णोऽक्षरं ह्रस्वो लघुर्जायते

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

भवति, तद्वदेव तथैव अष्टमान्त्यः नवमोपि ह्रस्वो लघुर्जायते छान्दसीयाः छन्दश्शास्त्रतत्त्वविदः तां शालिनीं तन्नाम्नीं वृत्तिं भाषन्ते कथयन्ति।

समासः—कम्बुवत् ग्रीवा यस्याः सा कम्बुग्रीवा तत्सम्बुद्धौ हे कम्बुग्रीवे। अन्ते भवोऽन्त्यः अष्टमस्याऽन्त्योऽष्टमान्त्यः।

व्याकरणम्—जायते=जन × लट्। विश्रामः=वि × श्रम् × घञ्। स्यात्=अस् लिङ्। भाषन्ते=भाष् लट्। छान्दसीयाः=छन्दस × अण् छः।

लक्षणान्तरे यथा—

शालिनी स्तौत्गौ ग् समुद्रऋषयः। पिङ्गलः।
मात् तौ गौ च शालिनी वेदलोकैः। छन्दोमञ्जरी।

यत्र प्रतिपादं मगणः तगणद्वयं च भवति तत् शालिनी नाम वृत्तमित्यर्थः।

म०	त०	त०	गु०	गु०
ऽ ऽ ऽ	ऽ ऽ।	ऽ ऽ।	ऽ	ऽ

उदाहरणं यथा—

अंहो हन्ति ज्ञानवृद्धिं विधत्ते धर्मं धत्ते काममर्थं च सूते।
मुक्तिं दत्ते सर्वदोपास्यमाना पुंसां श्रद्धाशालिनी विष्णुभक्तिः॥

भाषा—जिस छन्द में षष्ठ और नवम अक्षर ह्रस्व हों और चार चार-तथा सात सात अक्षरों पर विश्राम हो उसको छन्द के जानने वाले शालिनी छन्द कहते हैं॥ १७॥

(१५) मन्दाक्रान्ताछन्दः।

चत्वारः प्राक्सुतनु! गुरवो द्वौ दशैकादशौ चे-
न्मुग्धे वर्णौ तदनुकुमुदामोदिनि! द्वादशान्त्यौ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तद्वच्चान्त्यौ युगरसहयैर्यत्र कान्ते ! विरामो ।
मन्दाक्रान्तां प्रवरकवयस्तन्वि ! तां संगिरन्ते ॥१८॥

अन्वयः—हे सुतनु ! यत्र प्राक् चत्वारो वर्णाः गुरवः स्युः । हे कुमुदामोदिनि ! दशैकादशौ, तथा द्वादशान्त्यौ तद्वदेव अन्त्यावपि द्वौ वर्णौ दीर्घौ स्याताम्, यत्र युगरसहयैः विरामश्च स्यात् । हे मुग्धे ! प्रवरकवयः तां मन्दाक्रान्तां सङ्गिरन्ते ।

व्याख्या—हे सुतनु शोभनगात्रि ! यत्र यस्मिन् छन्दसि प्राक् प्रथमं चत्वारः चतुः संख्यकाः वर्णा अक्षराणि गुरवः दीर्घाः स्युः । हे कुमुदामोदिनि कुमुदसौरभशालिनि ! दशैकादशौ दशसंख्यकैकादशसंख्यकौ तथा द्वादशान्त्यौ त्रयोदशचतुर्दशौ तद्वदेव तथैव अन्त्यौ षोडश-सप्तदशौ च द्वौ वर्णौ अक्षरे दीर्घौ गुरू (स्याताम्) युगरसहयैः चतुर्भिः षड्भिः सप्तभिश्च अक्षरैः विरामः विश्रामो भवेत् हे मुग्धे सुन्दरि ! प्रवरकवयः श्रेष्ठकाव्यविदः तां पूर्वोक्तलक्षणलक्षितां मन्दाक्रान्तां तन्नामकं छन्दः सङ्गिरन्ते कथयन्ति ।

समासः—सुष्ठु शोभना तनुर्यस्याः सा सुतनुः तत्सम्बुद्धौ हे सुतनु ! दश च एकादश च दशैकादशौ । कुमुदस्य आमोद इव आमोदोऽस्त्यस्याः सा कुमुदामोदिनी तत्सम्बुद्धौ हे कुमुदामोदिनि ! । द्वादशस्य अन्त्यौ द्वादशान्त्यौ । युगश्च रसश्च हयश्च युगरसहयास्तैः युगरसहयैः । प्रवराश्च ते कवयश्च प्रवरकवयः ।

व्याकरणम्—विरामः = वि × रम् × घञ् । सङ्गिरन्ते=सम्=गृ × लट् ।

लक्षणान्तरे यथा—

मन्दाक्रान्ता म्भौ न्तौ त्गौ ग् समुद्रर्तुस्वराः पिङ्गलः ।
मन्दाक्रान्ताम्बुधिरसनगैर्मो भ्नौ गौ गयुग्मम् । छन्दोमञ्जरी ।

यत्र प्रतिपादं मगण-भगण-नगण-तगणेभ्यः परं गुरुद्वयं तत् मन्दाक्रान्तानाम वृत्तमित्यर्थः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

म०	भ०	न०	त०	त०	गु०	गु०
ऽऽऽ	ऽ।।	।।।	ऽऽ।	ऽऽ।	ऽ	ऽ

उदाहरणं यथा—

प्रेमालापः प्रियवितरणैः प्रीणितालिङ्गनाद्यैः
मन्दाक्रान्ता तदनु नियतं वश्यतामेति बाला ।
एकं शिक्षावचनसुधया राधिकायाः सखीनां
प्रीतः पायात् स्मितसुवदनो देवकीनन्दनो नः ॥

भाषा—जिसके सब चरणों में प्रथम से चारवर्ण उसके बाद दशम एकादश-त्रयोदश-चतुर्दश-षोडश-और सप्तदश-अक्षर गुरु हों और चार चार छः छः तथा सात सात वर्णों पर विश्राम हो वह मन्दाक्रान्ता नाम छन्द कहा गया है ॥ १८ ॥

(१६) हंसीछन्दः ।

मन्दाक्रान्तान्त्ययतिरहिता सालङ्कारे ! भवति यदि सा ।
तद्विद्वद्भिर्ध्रुवमभिहिता ज्ञेया हंसी कमलवदने ! ॥१९॥

अन्वयः—हे सालङ्कारे ! यदि मन्दाक्रान्ता अन्त्ययतिरहिता भवति, तदा हे कमलवदने ! तद्विद्वद्भिः ध्रुवम् अभिहिता सा हंसी ज्ञेया ॥

व्याख्या—हे सालङ्कारे हे भूषणभूषिते ! यदि मन्दाक्रान्ता तन्नाम्नी वृत्तिः अन्त्ययतिरहिता अन्त्यविरामशून्या भवति, तदा हे कमलवदने पङ्कजमुखि ! तद्विद्वद्भिः छन्दोविद्भिः ध्रुवं निश्चयेन अभिहिता कथिता सा मन्दाक्रान्तावृत्तिः हंसी तन्नाम्नी वृत्तिः ज्ञेया बोध्या सर्वैरिति शेषः ।

समासः—अन्त्या चासौ यतिरन्त्ययतिः तया रहिता अन्त्ययतिरहिता । अलङ्कारेण सहिता सालङ्कारा तत्सम्बुद्धौ हे सालङ्कारे । तस्य विद्वांसस्तद्विद्वांसस्तैः तद्विद्वद्भिः । कमलमिव वदनं यस्याः सा कमलवदना तत्सम्बुद्धौ हे कमलवदने ! ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

व्याकरणम्—भवति = भू × लट्। अभिहिता = अभि × धा × क्तः × टाप्। ज्ञेया = ज्ञा × यत् × टाप्।

लक्षणान्तरं यथा—

ज्ञेया हंसी मभनगयुता। छन्दो०।

यत्र मगण-भगण-नगणाः एकगुरुश्च प्रतिपादं सन्ति सा हंसी नाम वृत्तिरित्यर्थः।

म०	भ०	न०	गु०
ऽऽऽ	ऽ।।	।।।	ऽ

उदाहरणं यथा—

हिंसाद्वेषौ प्रकृतिसुलभौ दुर्वृत्तानामनुदिनमतः।
तैः संसारो घृणिततरकः रम्योऽप्येवं सदयहृदयैः॥

भाषा—जिस छन्द के सब चरणों में प्रथम-चार-अक्षर दीर्घ हो और बाद पांच अक्षर ह्रस्व हों फिर दशम अक्षर दीर्घ हो, और चार चार-तथा छः छः अक्षरों पर विश्राम हो उसको हंसी छन्द जानना॥१९॥

(१७) दोधकवृत्तम्।

आद्यचतुर्थमहीननितम्बे! सप्तमकं दशमं च तथान्त्यम्।
यत्र गुरुः प्रकटस्मरसारे! तत्कथितं ननु दोधकवृत्तम्॥२०॥

अन्वयः—हे अहीननितम्बे! यत्र आद्यचतुर्थं सप्तमकं दशमं तथा अन्त्यञ्च गुरु (स्यात्), हे प्रकटस्मरसारे! तत् ननु दोधकवृत्तं कथितम्।

व्याख्या—हे अहीननितम्बे स्थूलनितम्बभागे! यत्र यस्मिन् छन्दसि आद्यचतुर्थं प्रथम-तुरीयम् सप्तमकं सप्तमं दशमं दशसंख्याकं तथा अन्त्यम् एकादशं च अक्षरं गुरु दीर्घं स्यात्। हे प्रकटस्मरसारे सञ्जातकामोदये! तत् उक्तलक्षणलक्षितं ननु खलु दोधकवृत्तं तन्नामकं छन्दः कथितम् अभिहितम् पण्डितैरिति शेषः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

समासः—आद्यं च चतुर्थं च अनयोः समाहारः आद्यचतुर्थम्। अहीनौ नितम्बौ यस्याः सा अहीननितम्बा तत्सम्बुद्धौ हे अहीननितम्बे ! । स्मरस्य सारः स्मरसारः प्रकटः स्मरसारो यस्याः सा प्रकटस्मरसारा तत्सम्बुद्धौ हे प्रकटस्मरसारे ।

व्याकरणम्—अन्ते भवमन्त्यम् अन्त्यशब्दाद् भवार्थे यत् (अन्त × यत्)। कथितम् = कथ × क्तः।

लक्षणान्तरं यथा—

दोधकमिच्छति भक्तियाद् गौ । छन्दोमञ्जरी ।

यत्र प्रतिपादं भगणत्रयं गुरुद्वयं च भवेत् तत् दोधकनामवृत्तमित्यर्थः।

भ०	भ०	भ०	गु०	गु०
ऽ।।	ऽ।।	ऽ।।	ऽ	ऽ

उदाहरणं यथा—

देव ! सदोर्ध्वकदम्बतलस्थ ! श्रीधर ! तावकनामपदं मे ।
कण्ठतलेऽसुविनिर्गमकाले स्वल्पमपि क्षणमेष्यति योगम् ॥

भाषा—जिसके प्रथम चतुर्थ सप्तम दशम और एकादश अक्षर गुरु हों वह दोधक नाम छन्द कहा गया है ॥ २० ॥

(१८) इन्द्रवज्राछन्दः।

यस्यां त्रिषट्सप्तममक्षरं स्याद्-
ह्रस्वं सुजङ्घे ! नवमं च तद्वत् ।
गत्याविलज्जीकृतहंसकान्ते !
तामिन्द्रवज्रां ब्रुवते कवीन्द्राः ॥२१॥

अन्वयः—हे सुजङ्घे ! हे गत्याविलज्जीकृतहंसकान्ते ! यस्यां त्रिषट्सप्तमं तद्वत् नवमञ्च अक्षरं ह्रस्वं स्यात्, कवीन्द्राः तां इन्द्रवज्रां ब्रुवते ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

व्याख्या—हे सुजङ्घे शोभनजङ्घावति! हे गत्याविलज्जीकृत-हंसकान्ते गमनेन व्रीडीकृतमरालशोभे! यस्यां वृत्तौ त्रिषट्सप्तमं तृतीयं षष्ठं सप्तमं सप्तसंख्यकं तद्वत् तथैव नवमं च अक्षरं वर्णः ह्रस्वं लघु स्यात् भवेत्, कवीन्द्राः कविश्रेष्ठाः तां उक्तलक्षणलक्षितां इन्द्रवज्रां तन्नाम्नीं वृत्तिं ब्रुवते कथयन्ति।

समासः—सुष्ठु शोभने जङ्घे यस्याः सा सुजङ्घा तत्सम्बुद्धौ हे सुजङ्घे!। गत्या विलज्जीकृता हंसकान्तिर्यया सा विलज्जाकृत-हंसकान्तिस्तत्सम्बुद्धौ हे गत्याविलज्जीकृतहंसकान्ते। कवीनामिन्द्राः कवीन्द्राः।

व्याकरणम्—स्यात्=अस् ✕ लिङ्। ब्रुवते=ब्रू लट्।

लक्षणान्तरे यथा—

इन्द्रवज्रा तौ जगौ ग्। पिङ्गलः।

स्यादिन्द्रवज्रा यदि तौ जगौ गः॥ छन्दोमञ्जरी।

यत्र सर्वे पादाः तगणद्वयेन जगणेन गुरुद्वयेन च युक्ताः तत् इन्दवज्रा नाम वृत्तमित्यर्थः।

त०	त०	ज०	गु०	गु०
ऽ ऽ ।	ऽ ऽ ।	। ऽ ।	ऽ	ऽ

उदाहरणं यथा—

गोष्ठे गिरिं सव्यकरेण धृत्वा रुष्टेन्द्रवज्राहतिमुक्तवृष्टौ।
यो गोकुलं गोपकुलञ्च सुस्थं चक्रे स नो रक्षतु चक्रपाणिः॥

भाषा—जिसके प्रथम तृतीय षष्ठ सप्तम और नवम अक्षर ह्रस्व हों वह इन्द्रवज्रा छन्द कहा गया है॥ २१॥

(१६) उपेन्द्रवज्राछन्दः।

यदीन्द्रवज्राचरणेषु पूर्वे
भवन्ति वर्णा लघवः सुवर्णे!।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अमन्दमाद्यन्मदने ! तदानी
मुपेन्द्रवज्रा कथिता कवीन्द्रैः ॥ २२ ॥

अन्वयः—हे सुवर्णे ! हे अमन्दमाद्यन्मदने ! यदि इन्द्रवज्राचरणेषु पूर्वे वर्णा लघवो भवन्ति, तदानीं कवीन्द्रः उपेन्द्रवज्रा कथिता।

व्याख्या—हे सुवर्णे हे शोभनवर्णवति। हे अमन्दमाद्यन्मदने हे प्रवृद्धकामवति ! यदि इन्द्रवज्राचरणेषु इन्द्रवज्रासकलपादेषु पूर्वे प्रथमे वर्णा अक्षराणि लघवो ह्रस्वा भवन्ति वर्तन्ते, तदानीं कविन्द्रैः कविश्रेष्ठैः सा उपेन्द्रवज्रा कथिता उक्ता।

समासः—सुष्ठु शोभनो वर्णो यस्याः सा सुवर्णा तत्सम्बुद्धौ हे सुवर्णे। अमन्दं माद्यन् मदनो यस्याः सा अमन्दमाद्यन्मदना तत्सम्बुद्धौ हे अमन्दमाद्यन्मदने।

व्याकरणम्-भवन्ति=भू × लट्। कथिता कथ × क्तः × टाप्।

लक्षणान्तरे यथा—

उपेन्द्रवज्रा ज्तौ ज्गौग्। छन्दोमञ्जरी।
उपेन्द्रवज्रा प्रथमे लघौ सा। पिङ्गलः।

यस्मिन् प्रतिपादं जगण-तगण-जगणाः गुरुद्वयं च तत् उपेन्द्रवज्रा नाम वृत्तमित्यर्थः।

ज०	त०	ज०	गु०	गु०
।ऽ।	ऽऽ।	।ऽ।	ऽ	ऽ

उदाहरणं यथा--

उपेन्द्रवज्रादिमणिच्छटाभिर्विभूषणानां छुरितं वपुस्ते।
स्मरामि गोपीभिरुपास्यमानं सुरद्रुमूले मणिमण्डपस्थम् ॥

भाषा—यदि इन्द्रवज्रा के सब चरणों में प्रथम अक्षर ह्रस्व हों तो वह उपेन्द्रवज्रा छन्द कहागया है ॥ २२ ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

(२०) उपजातिछन्दः ।

यत्र द्वयोरप्यनयोस्तु पादा
भवन्ति सीमन्तिनि ! चन्द्रकान्ते ! ।
विद्वद्भिराद्यैः परिकीर्तिता सा
प्रयुज्यतामित्युपजातिरेषा ॥ २३ ॥

अन्वयः—हे चन्द्रकान्ते हे सीमन्तिनि ! यत्र अनयोः द्वयोः अपि पादा भवन्ति । आद्यैः विद्वद्भिः परिकीर्त्तिता सा एषा उपजातिः इति प्रयुज्यताम् ।

व्याख्या—हे चन्द्रकान्ते हे इन्दुद्युते ! हे सीमन्तिनि हे विन्यस्तकेशवति ! यत्र यस्मिन् छन्दसि अनयोः इन्द्रवज्रोपेन्द्रवज्रयोः द्वयोः उभयोः अपि पादाश्चरणाः (प्रथम-तृतीयाविन्द्रवज्रायाः द्वितीयचतुर्थावुपेन्द्रवज्रायाः), आद्यैः प्राचीनैः विद्वद्भिः पण्डितैः परिकीर्तिता प्रतिपादिता सा असौ एषा इयं उपजातिः तन्नामकं वृत्तं प्रयुज्यतां ज्ञायताम् ।

समासः—चन्द्रस्य कान्तिरिव कान्तिर्यस्याः सा चन्द्रकान्तिस्तत्सम्बुद्धौ हेचन्द्रकान्ते ! । सीमन्तः केशवेशः सोऽस्त्यस्याः सीमन्तिनि तत्सम्बुद्धौ हेसीमन्तिनि ! ।

व्याकरणम्—भवन्ति = भू × लट् । परिकीर्त्तिता = परि × कीर्त × क्तः × टाप् । प्रयुज्यताम् = प्र × युज × यक् × लोट् ।

लक्षणान्तरे यथा—

आद्यान्तवुपजातयः । पिङ्गलः ।
अनन्तरोदीरितलक्ष्मभाजौ ।
पादौ यदीयावुपजातयस्ताः । छन्दोमञ्जरी ।

यत्र प्रथम-तृतीयपादाविन्द्रवज्रायाः द्वितीयचतुर्थपादावुपेन्द्रवज्रायाश्च भवेताम् सा उपजातिर्नाम वृत्तिरित्यर्थः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

उदाहरणं यथा—

अत्रानुगोदं मृगयानिवृत्तः तरङ्गवातेन विनीतखेदः ।
रहस्त्वदुत्सङ्गनिषण्णमूर्धा स्मरामि वानीरगृहेषु सुप्तः ॥

भाषा—जिस छन्दके प्रथम और तृतीय पाद इन्द्रवजाका हो और द्वितीय तथा चतुर्थ पाद उपेन्द्रवज्रा का हो तो वह उपजाति छन्द कहा ा है ॥ २३ ॥

(२१) आख्यानकीछन्दः ।

आख्यानकी स्यात्प्रकटीकृतार्थे !
यदीन्द्रवज्राचरणः पुरस्तात् ।
उपेन्द्रवज्राचरणास्त्रयोऽन्ये
मनीषिणोक्ता विपरीतपूर्वा ॥ २४ ॥

अन्वयः—हे प्रकटीकृतार्थे ! यदि पुरस्तात् इन्द्रवज्राचरणः अन्ये च त्रयः उपेन्द्रवज्राचरणाः स्युः, तदा मनीषिणा विपरीतपूर्वा आख्यानकी उक्ता ।

व्याख्या—हे प्रकटीकृतार्थे साक्षात्कृताऽभिप्राये ! यदि पुरस्तात् प्रथमं इन्द्रवज्राचरणः इन्द्रवज्रापादः भवेत्, अन्ये अवशिष्टाः त्रयः त्रिसंख्यकाः उपेन्द्रवज्राचरणाः उपेन्द्रवज्रासदृशपादाः (स्युः), तदा मनीषिणा विदुषा विपरीतपूर्वा आख्यानकी तन्नाम्नी वृत्तिः उक्ता कथिता ।

समासः—प्रकटीकृतोऽर्थो यया सा प्रकटीकृतार्था तत्सम्बुद्धौ हे प्रकटीकृतार्थे । इन्द्रवज्रायाश्चरणः इन्द्रवज्राचरणः । उपेन्द्रवज्रायाश्चरणा उपेन्द्रवज्राचरणाः । विपरीतः पूर्वो यस्याः सा विपरीतपूर्वा ।

व्याकरणम्-स्यात्=अस् × लिङ् । उक्ता=वच् × क्तः × टाप् ।

लक्षणान्तरं यथा—

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

आख्यानकी तौ जगुरू गञ्जोजे, जतावनोजे जगुरू गुरुश्चेत्।

त०	त०	ज०	गु०	गु०
ऽऽ।	ऽऽ।	।ऽ।	ऽ	ऽ

ज०	त०	ज०	गु०	गु०
।ऽ।	ऽऽ।	।ऽ।	ऽ	ऽ

उदाहरणं यथा—

अंशे हिरण्याक्षरिपोः स जाते हिरण्यनाभे तनये नयज्ञः।
द्विषामसह्यः सुतरां तरूणां हिरण्यरेता इव सानिलोऽभूत्॥

भाषा—जिसमें पहला चरण इन्द्रवज्रा का हो और तीन पाद उपेन्द्रवज्रा के हो तो वह आख्यानकी छन्द होता है॥ २४॥

(२२) रथोद्धताछन्दः।

आद्यमक्षरमतस्तृतीयकं
सप्तमं च नवमं तथान्तिमम्।
दीर्घमिन्दुमुखि! यत्र जायते
तां वदन्ति कवयो रथोद्धताम्॥ २५॥

अन्वयः—हे इन्दुमुखि! यत्र आद्यं अतः तृतीयकं सप्तमं नवमं तथा अन्तिमं च अक्षरं दीर्घं जायते कवयस्तां रथोद्धतां वदन्ति।

व्याख्या—हे इन्दुमुखि हे चन्द्रवदने! यत्र यस्मिन् वृत्ते आद्यं प्रथमं अतः अतःपरं तृतीयकं तृतीयं सप्तमं सप्तसंख्यकम् तथा अन्तिमं एकादशं च अक्षरं दीर्घं गुरु जायते भवति, कवयः कवितत्त्वज्ञाः तां उक्तलक्षणलक्षितां रथोद्धतां एतन्नामकं वृत्तं वदन्ति कथयन्ति।

समासः—इन्दुवन्मुखं यस्याः सा इन्दुमुखी तत्सम्बुद्धौ हे इन्दुमुखि।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

व्याकरणम्—जायते=जन् × लट्। वदन्ति=वद × लट्।

लक्षणान्तरे यथा—

रथोद्धता नौलौंग् ॥ पि०।

रात्परै र्नरलगै रथोद्धता ॥ छ०।



उदाहरणं यथा—

राधिका दधिविलोडनस्थिता। कृष्णवेणुनिनदैरथोद्धता।
यामु तटनिकुञ्जमञ्जसा सा जगाम सलिलाहृतिच्छलात् ॥

भाषा—जिस के सब चरणों में प्रथम तृतीय सप्तम नवम और एकादश अक्षर दीर्घ हों उसको कविजन रथोद्धता छन्द कहते हैं।

(२३) स्वागताछन्दः।

अक्षरं च नवमं दशमं चेद्व्य-
त्ययाद्भवति यत्र विनीते!
प्रोक्तमेणनयने! यदि सैव
स्वागतेति कविभिः कथितासौ ॥ २६ ॥

अन्वयः—हे विनीते! हे एणनयने! यत्र प्रोक्तं नवमं दशमं अक्षरं यदि चेत् व्यत्ययाद्भवति, तदा सैव असौ कविभिः स्वागता कथिता।

व्याख्या—हे विनीते विनयशीले! हे एणनयने मृगनेत्रे! यत्र यस्मिन् रथोद्धतावृत्ते प्रोक्तं कथितं नवमं नवसंख्यकं दशमं दशसंख्यकं च अक्षरं व्यत्ययात्वैपरीत्यात् यदि चेत् भवति, (तदा) सैव रथोद्धतैव असौ एषा कविभिः काव्यज्ञैः स्वागता एतन्नामिका वृत्तिः कथिता प्रतिपादिता।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

समासः—एणस्य नयने इव नयने यस्याः सा एणनयना तत्सम्बुद्धौ हे एणनयने!

व्याकरणम्—भवति=भू × लट्। प्रोक्तम्=प्र × वच् × क्तः। कथिता=कथ × क्तः × टाप्।

लक्षणान्तरे यथा—

स्वागतो नौभ्गौ ग्। पिङ्गलः।

स्वागता रनभगैर्गुरुणा च। छन्दोमञ्जरी।

र०	न०	भ०	गु०	गु०
ऽ।ऽ	।।।	ऽ।।	ऽ	ऽ

दाहरणं यथा—

यस्य चेतसि सदा मुरवैरी बल्लवोजनविलासविलोलः।
तस्य नूनममरालयभाजः स्वागतादरकरः सुरराजः॥

भाषा—जिस में रथोद्धता के विपरीत नवम और दशम अक्षर क्रम से लघु और गुरु हों उसे कवियों ने स्वागताछन्द कहा है (अर्थात् रथोद्धता में नवम और गुरु-और दशम लघु होता है इसमें नवम अक्षर लघु और दशम गुरु जानना)॥ २६॥

(२४) वैश्वदेवीछन्दः।

ह्रस्वो वर्णः स्यात्सप्तमो यत्र बाले!
तद्वद्विंश्वोष्ठि! न्यस्त एकादशाद्यः।
बाणैर्विश्रामस्तत्र चेद्वा तुरङ्गै-
र्नाम्ना निर्दिष्टा सुभ्रु! सा वैश्वदेवी॥२७॥

अन्वयः—हे बाले! यत्र सप्तमो वर्णो ह्रस्वः स्यात् तद्वत् एकादशाद्यः न्यस्तः तथा तत्र बाणैः वा तुरङ्गैः विश्रामश्चेत् तदा हे सुभ्रु! सा नाम्ना वैश्वदेवी निर्दिष्टा।

व्याख्या—हे बाले हे अल्पवयस्के! यत्र यस्यां वृत्तौ सप्तसं-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ख्यको वर्णः ह्रस्वो लघुः स्यात् भवेत्, हे बिम्बोष्ठि हे बिम्बफलसदृशोष्ठवति ! तद्वत् तथैव एकादशाद्यो दशमवर्णः ह्रस्वो न्यस्तः स्थापितः तत्र तस्मिन् वाणैः पञ्चभिरक्षरैः तुरङ्गैः सप्तभिरक्षरैर्वा विश्रामो विरामो भवेत् तदा हे सुभ्रु शोभनभ्रुकुटिशालिनि ! सा वृत्तिः नाम्ना वैश्वदेवी निर्दिष्टा उक्ता विद्वद्भिरिति शेषः ।

समासः—बिम्बवत् ओष्ठौ यस्याः सा बिम्बोष्ठी तत्सम्बुद्धौ हे बिम्बोष्ठि ! एकादशस्य आद्य एकादशाद्यः ।

व्याकरणम्—स्यात् = अस् × लिङ् । न्यस्तः = नि × अस × क्तः । निर्दिष्टा = निर् × दिश् × क्तः × टाप् ।

तल्लक्षणान्तरं यथा—

वैश्वदेवी मौ याविन्द्रियऋषयः । पिङ्गलः ।

म० म० य० य०

ऽ ऽ ऽ ऽ ऽ ऽ । ऽ ऽ । ऽ ऽ

उदाहरणं यथा—

पद्मव्याकोशं भास्करं बालचन्द्रं
वापीविस्तीर्णं स्वस्तिकं पूर्णकुम्भम् ।
तत्कस्मिन् देशे दर्शयाम्यात्मशिल्पम्
दृष्ट्वा श्वो यद्विस्मयं यान्ति पौराः ।

भाषा—जिसके सब चरणों में सप्तम और दशम अक्षर ह्रस्व हों, और पांच पांच, सात सात अक्षरों पर विश्राम हो तो वह वैश्वदेवी छन्द कहा गया है ॥ २७ ॥

(२५) तोटकछन्दः ।

सतृतीयकषष्ठमनन्तरते !
नवमं विरतिप्रभवं गुरु चेत् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

घनपीनपयोधरभारनते !
ननु तोटकवृत्तमिदं कथितम् ॥ २८ ॥

अन्वयः—हे अनन्तरते ! सतृतीयकषष्ठं नवमं विरतिप्रभवं च गुरुः स्यात् चेत् ननु तदा हे घनपीनपयोधरभारनते ! इदं तोटकवृत्तं कथितम् ।

व्याख्या—हे अनन्तरते हे अधिकरतिशीले ! सतृतीयकषष्ठं तृतीय-षष्ठाक्षरसहितं नवमं नवसंख्यकं विरतिप्रभवं द्वादशं च अक्षरं गुरु दीर्घं स्यात् चेत् यदि, तदा हे घनपीनपयोधरभारनते निबिड-स्थूलस्तनभरनम्रे ! इदं एतत् तोटकवृत्तं तोटकनामच्छन्दः कथितं प्रतिपादितं ननु निश्चयेन ।

समासः—अनन्ता अधिका रतिः क्रीडा यस्याः सा अनन्तरतिस्तत्सम्बुद्धौ हे अनन्तरते ! तृतीयमेव तृतीयकं तृतीयकं च षष्ठं च तृतीयकषष्ठे ताभ्यां साहितं सतृतीयकषष्ठम् । विरतिः प्रभवो यस्य तत् विरतिप्रभवम् । घनौ पीनौ च तौ पयोधरौ घनपीनपयोधरौ तयोर्भारस्तेन नता घनपीनपयोधरभारनता तत्सम्बुद्धौ हे घनपीनपयोधरभारनते ।

व्याकरणम्—कथितम् = कथ् × क्तः ।

लक्षणान्तरे यथा—

तोटकं सः । पि०
वद तोटकमब्धिसकारयुतम् । छ०

स०	स०	स०	स०
।।S	।।S	।।S	।।S

उदाहरणं यथा—

यमुनातटमच्युत केलिकलासदङ्घ्रिसरोरुहसङ्गरुचिम् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

मुदितोऽटकलेरपनेतुमघं यदि चेच्छसि जन्म निजं सफलम्

भाषा—जिसके सब चरणों में तृतीय पञ्च नवम और बारहवां अक्षर दीर्घ हों वह तोटकवृत्त कहा गया है ॥ २८ ॥

[२६] भुजङ्गप्रयातछन्दः ।

यदाद्यं चतुर्थं तथा सप्तमं चे
त्तथैवाक्षरं ह्रस्वमेकादशाद्यम् ॥
शरच्चन्द्रविद्वेषिवक्त्रारविन्दे !
तदुक्तं कवीन्द्रैर्भुजङ्गप्रयातम् ॥ २९ ॥

अन्वयः—हे शरच्चन्द्रविद्वेषिवक्त्रारविन्दे ! यदा आद्यं चतुर्थं तथा सप्तमं तथैव एकादशाद्यं अक्षरं ह्रस्वं चेत् तदा कवीन्द्रैः तत् भुजङ्गप्रयातं उक्तम् ॥

व्याख्या—हे शरच्चन्द्रविद्वेषिवक्त्रारविन्दे हे शरदिन्दूत्तममुखाब्जे ! यदा आद्यं प्रथमं चतुर्थं तुरीयं तथा सप्तमं सप्तसंख्यकं तथैव एकादशाद्यं दशमं अक्षरं ह्रस्वं लघु चेत्, तदा तत् उक्तलक्षणघटितं कवीन्द्रैः कविवर्यैः भुजङ्गप्रयातम् उक्तं कथितम् ।

समासः—शरदश्चन्द्रः शरच्चन्द्रस्तं विद्वेष्टुं शीलमस्येति शरच्चन्द्रविद्वेषि तादृशं वक्त्रारविन्दं मुखकमलं यस्याः सा तथोक्ता तत्सम्बुद्धौ हे शरच्चन्द्रविद्वेषिवक्त्रारविन्दे ! । एकादशस्य आद्यं एकादशाद्यम् । कवीनामिन्द्राः कवीन्द्रास्तैः ।

व्याकरणम्—उक्तम् = वच् × क्तः ।

लक्षणान्तरे यथा—

भुजङ्गप्रयातं यः । पिङ्गलः ।
भुजङ्गप्रयातं चतुर्भिर्यकारैः । छन्दोम० ।

य० य० य० य०

ISS ISS ISS ISS

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Panini Kanya Maha Vidyalaya Collection. Digitized by eGangotri

उदाहरणं यथा--

सदारात्मजज्ञातिभृत्यो विहाय स्वमेतं हृदं जीवनं लिप्समानः।
मयाक्लेशितः कालियेत्थं कुरु त्वं भुजङ्ग ! प्रयातं द्रुपं सागराय।

भाषा—जिसमें हरएक चरणके प्रथम चतुर्थ सप्तम और दशम अक्षर ह्रस्व हों उसे कवियों ने भुजङ्गप्रयात कहा है ॥ २९ ॥

(२७) द्रुतविलंबितछन्दः ।

अयि कृशोदरि ! यत्र चतुर्थकं
गुरु च सप्तमकं दशमं तथा ।
विरतिजं च तथैव विचक्षणै-
र्द्रुतविलम्बितमित्युपदिश्यते ॥ ३० ॥

अन्वय--अयि कृशोदरि ! यत्र चतुर्थकं सप्तमकं तथा दशमं तथैव विरतिजं च अक्षरं गुरु भवति । विचक्षणैः तत् द्रुतविलम्बितम् इति उपदिश्यते ।

व्याख्या—अयि कृशोदरि सूक्ष्मोदरवति ! यत्र यस्मिन् वृत्ते चतुर्थकं तुरीयं सप्तमकं सप्तमं तथा तेन प्रकारेण दशमं दशसंख्यकं तथैव तेनैव प्रकारेण विरतिजं विश्रामप्रभवं च अक्षरं गुरु दीर्घं भवति विचक्षणैः पण्डितैः तत् प्रसिद्धं उक्तलक्षणलक्षितं द्रुतविलम्बितं तन्नामकं वृत्तम् उपदिश्यते कथ्यते ।

समासः—कृशं उदरं यस्याः सा कृशोदरी तत्सम्बुद्धौ हे कृशोदरि ! विरतौ जातं विरतिजम् ।

व्याकरणम्—उपदिश्यते=उप × दिश् × यक् × लट् ।

लक्षणान्तरे यथा--

द्रुतविलम्बितं नभौ भ्रौ । पिंगलः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

द्रुतविलंबितमाह नभौ भरौ।

न० भ० भ० र०

।।।	ऽ।।	ऽ।।	ऽ।ऽ

उदाहरणं यथा--

तरणिजापुलिने नवबल्लवीपरिषदा सह केलिकुतूहलात्।
द्रुतविलम्बित चारुविहारिणं हरिमहं हृदयेन सदा वहे ॥

भाषा—जिसके सब चरणों में चतुर्थ, सप्तम दशम, और बारहवां अक्षर गुरु हों वह पण्डितों से द्रुतविलम्बित नाम छन्दकहा गया है॥

(२८) प्रमिताक्षराछन्दः।

यदि तोटकस्य गुरु पञ्चमकं
विहितं विलासिनि ! तदक्षरकम्।
रससंख्यकं गुरु न चेदबले !
प्रमिताक्षरेति कविभिः कथिता ॥३१॥

अन्वयः—हे विलासिनि ! यदि तोटकस्य पञ्चमकं तद् अक्षरकं गुरु विहितं तथा रससंख्यकं षट्संख्यकं च गुरु न चेत् तदा हे अबले ! (सा) कविभिः प्रमिताक्षरा इति कथिता।

व्याख्या—हे विलासिनि विलासवति ! यदि यदा तोटकस्य तोटकनामवृत्तस्य पञ्चमकं पञ्चमं तत् प्रसिद्धं अक्षरकं गुरु दीर्घं विहितं कृतं तथा तेन प्रकारेण रससंख्यकं षष्ठमक्षरं च गुरु न चेत न स्यात्, तदा हे अबले ! सा वृत्तिः कविभिः काव्यज्ञैः प्रमिताक्षरा इति कथिता प्रतिपादिता।

समासः—विलासोऽस्त्यस्या इति विलासिनी तत्सम्बुद्धौ हे विलासिनि !। रसः सङ्ख्या यस्य तत् रससंख्यकम्।

व्याकरणम्—विहितम् = वि × धा × क्तः । कथिता = कथ × क्तः × टाप्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

लक्षणान्तरे यथा—

प्रमिताक्षरा म्जौ सौ। पिंगलः।

प्रमिताक्षरा सजजसैः कथिता। छन्दोम०।



उदाहरणं यथा—

उदाहरणं यथा—

अमृतस्य शीकरमिवोद्विरती रदमौक्तिकांशुलहरीच्छुरिता।
प्रमिताक्षरा मुररिपोर्भणितिर्व्रजसुभ्रुवामभिजहार मनः॥

भाषा—तोटकवृत्तके चरणका पञ्चम अक्षर दीर्घ हो और षष्ठ अक्षर ह्रस्व हो तो वह प्रमिताक्षरा नाम छन्द कहा गया है॥३१॥

(२९) हरिणीप्लुताछन्दः।

प्रथमाक्षरमाद्यतृतीययो-
र्द्रुतविलम्बितकस्य च पादयोः।
यदि चेन्न तदा कमलेक्षणे!
भवति सुन्दरि! सा हरिणीप्लुता॥३२॥

अन्वयः—हे कमलेक्षणे! हे सुन्दरी! अत्र द्रुतविलम्बितकस्य आद्य-तृतीययोः पादयोः प्रथमाक्षरं यदि न चेत् तदा सा हरिणीप्लुता भवति।

व्याख्या—हे कमलेक्षणे हे पद्मनेत्रे! हे सुन्दरि हे सौन्दर्यवति! यत्र यस्मिन् छन्दसि द्रुतविलम्बितकस्य द्रुतविलम्बितनामवृत्तस्य आद्य-तृतीतयोः प्रथम-तृतीययोः पादयोः चरणयोः प्रथमाक्षरं आद्यवर्णो यदि न चेत् न स्यात् तदा सा हरिणीप्लुता भवति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

समासः—प्रथमं च तदक्षरं च प्रथमाक्षरम्। आद्यश्च तृतीयश्च आद्यतृतीयौ तयोः। कमले इव ईक्षणे यस्याः सा कमलेक्षणा तत्सम्बुद्धौ हे कमलेक्षणे!।

व्याकरणम्—भवति=भू×लट्

लक्षणान्तरे यथा—

मात सौ जौ भरसंयुतौ करिवाणखैः हारिणप्लुता।

भाषा—जिस में द्रुतविलम्बित छन्द के पहला तीसरा पादका अक्षर न हो वह हरिणीप्लुता नाम छन्द है ॥३१॥

(३०) वंशस्थं वृत्तम्।

उपेन्द्रवज्राचरणेषु सन्ति चे-
द्युपान्त्यवर्णा लघवः कृता यदा।
मदोल्लसद्भ्रूजितकामकार्मुके!
वदन्ति वंशस्थमिदं बुधास्तदा ॥३३॥

अन्वयः—हे मदोल्लसद्भ्रूजितकामकार्मुके! चेत् उपेन्द्रवज्राचरणेषु उपान्त्यवर्णा यदा लघवः कृताः सन्ति तदा बुधाः इदं वंशस्थं वदन्ति।

व्याख्या—हे मदोल्लसद्भ्रूजितकामकार्मुके सहर्षं भ्रुकुटिनीचीकृतमदनचापे! चेत् यदि उपेन्द्रवज्राचरणेषु उपेन्द्रवज्रापादेषु उपान्त्यवर्णाः एकादशसंख्यकाक्षराणि यदा लघवो ह्रस्वाः कृताः सन्ति वर्तन्ते तदा बुधाः पण्डिता इदम् एतम् वंशस्थं तन्नामकं छन्द वदन्ति कथयन्ति।

समासः—मदेन उल्लसन्तौ मदोल्लसन्तौ तौ च तौ भ्रुवौ मदोल्लसद्भ्रुवौ ताभ्यां जितं पराजितं कामकार्मुकं यया सा मदोल्लसद्भ्रूजितकामकार्मुका तत्सम्बुद्धौ हे मदोल्लसद्भ्रूजितकामकार्मुके!। उपेन्द्रवज्रायाश्चरणा उपेन्द्रवज्राचरणास्तेषु। अन्त्यस्य

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

समीपे ये सन्ति ते उपान्त्या उपान्त्याश्च ते वर्णा उपान्त्यवर्णाः।

व्याकरणम्-सन्ति=अस् × लट्। कृताः=कृ × क्तः। वदन्ति = वद् × लट्।

लक्षणान्तरे यथा—

वंशस्था ज्तौ जरौ। पिङ्गलः।

वदन्ति वंशस्थविलं जतौ जरौ। छन्दोम०

ज० त० ज० र०

।ऽ। ऽऽ। ।ऽ। ।ऽ।

उदाहरणं यथा—

विलासवंशस्थविलं मुखानिलैः
प्रपूर्य यः पञ्चमरागमुद्गिरन्।
व्रजाङ्गनानामपि गानशालिनाम् (सक्तचेतसाम्)
जहार मासं स हरिः पुनातु नः॥

भाषा—उपेन्द्रवज्रा के सब पादों में ग्यारहवां अक्षर लघु हो तो उसको वंशस्थ कहते हैं॥ ३३॥

(३१) इन्द्रवंशाछन्दः।

यस्यामशोकाङ्कुरपाणिपल्लवे!
वंशस्थपादा गुरुपूर्ववर्णकाः॥
तारुण्यहेलारतिरङ्गलालसे!
तामिन्द्रवंशां कवयः प्रचक्षते॥३४॥

अन्वयः—हे अशोकांकुरपाणिपल्लवे! हे तारुण्य हेलारति रङ्गलाल से! यस्यां वंशस्थपादाः गुरुपूर्ववर्णका भवन्ति कवयः तां इन्द्रवंशां प्रचक्षते।

व्याख्या—हे अशोकाङ्कुरपाणिपल्लवे अशोकाङ्कुरहस्त-किसलये! हे तारुण्यहेलारतिरङ्गलालसे यौवनहेलाक्रीडाभि-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

लाषे ! यस्यां वृत्तौ वंशस्थपादाः वंशस्थचरणाः गुरुपूर्ववर्णकाः आदिदीर्घवर्णाः भवन्ति कवयः काव्यज्ञाः तां इन्द्रवंशां इन्द्रवंशानामवृत्ति प्रचक्षते कथयन्ति ।

समासः—अशोकस्य अङ्कुरोऽशोकाङ्कुरस्तद्वत् पाणिपल्लवो यस्याः सा अशोकाङ्कुरपाणिपल्लवा तत्सम्बुद्धौ हे अशोकाङ्कुरपाणिपल्लवे । वंशस्थस्य पादा वंशस्थपादाः। गुरुः पूर्ववर्णो येषां ते गुरुपूर्वबर्णकाः । तारुण्यस्य हेलाभिः रतिरङ्गे लालसा यस्याः सा तारुण्यहेलारतिरङ्गलालसा तत्सम्बुद्धौ हे तारुण्यहेलारतिरङ्गलालसे।

व्याकरणम्—प्रचक्षते = प्र × चक्ष् × लट् ।

लक्षणान्तरे यथा-

इन्द्रवंशा तौ जौ । पिङ्गलः ।

तच्चेन्द्रवंशा प्रथमाक्षरे । छन्दोम०

यस्य प्रतिचरणं तगणद्वयं जगणरगणौ च स्याताम् तदिन्द्रवंशानाम वृत्तमित्यर्थः ।

त० त० ज० र०

ऽ ऽ । ऽ ऽ । । ऽ । ऽ । ऽ

उदाहरणं यथा-

दैत्येन्द्रवंशाग्निरुदीर्णदीधितिः
पीताम्बरोऽसौ जगतां तमोपहः ।
यस्मिन् ममज्जुः शलभा इव स्वयं
ते कंसचाणूरमुखा मखद्विषः ॥

भाषा—यदि वंशस्थ छन्द के सब पादों का प्रथम अक्षर दीघ हो तो वह इन्द्रवंशा छन्द है ॥ ३४ ॥

(३२) प्रभावतीछन्दः ।

यस्यां प्रिये ! प्रथमकमक्षरद्वयं

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तुर्यं तथा गुरु नवमं दशान्तिकम् ॥
सान्त्यं भवेद्यतिविरतिर्युगग्रहैः
सा लक्षिता ह्यमृतलते प्रभावती ॥३५॥

अन्वयः—हे प्रिये हे अमृतलते ! यस्यां प्रथमकम् अक्षरद्वयम् तुर्यं नवमं सान्त्यं दशान्तिकं च गुरु भवेत् यदि युगग्रहैः विरतिर्भवेत् सा प्रभावती लक्षिता ।

व्याख्या—हे प्रिये प्रीतिदात्रि ! हे अमृतलते शोभनाङ्गि ! । यस्यां वृत्तौ प्रथमकं पूर्वं अक्षरकद्वयं वर्णद्वयं तुर्यं चतुर्थं नवमं नवसंख्यकं सान्त्यं अन्त्यवर्णसहितं त्रयोदशमिति यावत् दशान्तिकं एकादशं च गुरु भवेत् दीर्घं स्यात् यदि चेत् युगग्रहैःचतुर्भिः नवभिश्च वर्णैः विरतिर्विरामो भवेत् तदा सा एषा प्रभावती तन्नाम्नी वृत्तिः लक्षिता कथिता ॥

समासः—द्वयोर्भावो द्वयम् अक्षरयोर्द्वयमक्षरद्वयम् । दशस्य अन्तिकं दशान्तिकम् । अन्त्येन सहितं सान्त्यम् । युगाश्च ग्रहाश्च युगग्रहास्तैः । अमृतस्य लतेव लता=अङ्गलता, यस्याः सा अमृतलता तत्सम्बुद्धौ हे अमृतलते ! ।

व्याकरणम्—प्रथममेव प्रथमकम्=प्रथमशब्दात् स्वार्थे कः । भवेत्=भू×लिङ् । लक्षिता=लक्ष×क्तः×टाप् ।

लक्षणान्तरमुदाहरणरूपं यथा—

एते क्रमात्तभसजसंज्ञका गणा
गश्चान्ततो यदि निहितो महीपते ! ।
वेदैर्ग्रहैर्यदि भवति यतिश्च शोभना
नागाधिपो वदति तदा प्रभावतीम् ॥

त० भ० स० ज० गु०

SS। S।। ।।S ।S। S

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

भाषा—जिस वृत्तके चारो चरण में प्रथम दो अक्षर और चतुर्थ नवम एकादश त्रयोदश ये अक्षर सब दीर्घ हों और चार चार अक्षर पर तथा नव नव अक्षरों पर विश्राम हो तो वह प्रभावती नाम वृत्ति कही गई है ॥ ३५ ॥

(३३) प्रहर्षिणीछन्दः ।

आद्यं चेत्रितयमथाष्टमं नवान्त्यं
द्वे चान्त्ये गुरुविरतौ सुभाषिते ! स्यात् ॥
विश्रामो भवति महेशनेत्रदिग्भि-
र्विज्ञेया ननु सुभगे ! प्रहर्षिणी सा ॥३६॥

अन्वयः—हे सुभाषिते ! हे सुभगे ! चेत् आद्यं त्रितयं अथ अष्टमं नवान्त्यं उपान्त्यं विरतौ च एकं अक्षरं गुरु स्यात् महेश-नेत्रदिग्भिः विश्रामो भवति तदा सा प्रहर्षिणी विज्ञेया ननु ।

व्याख्या—हे सुभाषिते मधुरवचने ! हे सुभगे शोभनैश्वर्य-वति ! चेत् यति आद्यं प्रथमं, त्रितयं तृतीयं, नवान्त्यं दशमं, उपा-न्त्यं द्वादशं विरतौ विश्रामे च एकमक्षरं त्रयोदशमिति यावत् । गुरु दीर्घं स्यात् भवेत् तथा महेशनेत्रदिग्भिः महेशनेत्रैः त्रिभिरक्षरैः दिग्भिर्दशभिरक्षरैश्च विश्रामो विरामो भवति तदा सा प्रख्याता प्रह-र्षिणी विज्ञेया बोध्या ननु किल ।

समासः—सुष्ठु भाषितं यस्याः सा सुभाषिता तत्सम्बुद्धौ हे सुभाषिते ! । नवानामन्त्यं नवान्त्यत् । अन्त्यस्य समीपे यदस्ति तदुपान्त्यम् । महेशस्य नेत्राणि तानि च दिशश्च महेशनेत्रदिश-स्ताभिः ।

व्याकरणम्—स्यात् = अस् × लिङ् । भवति = भू × लट् । विज्ञेया = वि × ज्ञा × क्यप् ।

लक्षणान्तरे यथा—

प्रहर्षिणी म्ना ज्रौ ग् त्रिक् दशकौ । पिङ्गलः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitized by eGangotri

त्र्याशाभि र्मनजरगाः प्रहर्षिणीयम् । छन्दोम०

यत्र प्रतिपादं मगण-नगण-जगण-रगणाः सन्ति तदुत्तरमेको वर्णोगुरुः त्रिभिर्दशभिश्चाक्षरैर्विश्रामः तत् प्रहर्षिणीनाम छन्द इत्यर्थः ।

उदाहरणं यथा—

गोपीनामधरसुधारसस्य पानैः उत्तुङ्गस्तनकलसोपगूहनैश्च ।
आश्चर्यैरपि रतिविभ्रमैर्मुरारेः संसारे मतिरभवत्प्रहर्षिणीह ॥

भाषा—जिस में प्रतिपाद के प्रथम से तीन अक्षर और अष्टम, दशम द्वादश त्रयोदश ये सब अक्षर दीर्घ हो और तीन तीन तथा दश दश अक्षर पर विश्राम हों तो उसे प्रहर्षिणी छन्द जानना ॥ ३६ ॥

(३४) वसन्ततिलकाछन्दः ।

आद्यं द्वितीयमपि चेद्गुरु तच्चतुर्थं
यत्राष्टमं च दशमान्त्यमुपान्त्यमन्त्यम् ।
कामाङ्कुशाङ्कुशितकामितङ्गजेन्द्रे !
कान्ते ! वसन्ततिलकां किल तां वदन्ति ॥३७॥

अन्वयः—हे कामाङ्कुशाङ्कुशितकामितङ्गजेन्द्रे । हेकान्ते ! यत्र चेत् आद्यं द्वितीयं चतुर्थं अष्टमं दशमान्त्यं उपान्त्यम् अन्त्यम् च तत् अक्षरं गुरु स्यात् षड्भिरष्टभिश्चाक्षरै र्विश्रामश्च स्यात् तदा किल तां वसन्ततिलकां वदन्ति ।

व्याख्या—हे कामाङ्कुशाङ्कुशितकामितङ्गजेन्द्रे मदनाङ्कुशवशीकृतकामिकरीन्द्रे ! हेकान्ते कमनीयगात्रि ! यत्र यस्यां वृत्तौ चेत् यदि आद्यं प्रथमं, द्वितीयं चतुर्थं तुरीयं, अष्टमं, दशमान्त्यम् एकादशं, उपान्त्यं त्रयोदशं, अन्त्यं चतुर्दशं च अक्षरं गुरु स्यात् षड्भिरष्टभिश्चाक्षरैर्विश्रामश्च स्यात् तदा तां वसन्ततिलकां वदन्ति कथयन्ति बुधा इति शेषः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

समासः—कामश्चासावङ्कुशः कामाङ्कुशस्तेन अङ्कुशिताः कामिन एव मतङ्गजेन्द्रा यया सा कामाङ्कुशाङ्कुशितकामिमतङ्गजेन्द्रा तत्सम्बुद्धौ हेकामाङ्कुशाङ्कुशितकामिमतङ्गजेन्द्रे । दशमस्य अन्त्यं दशमान्त्यम् । उपान्ते भवमुपान्त्यम् ।

व्याकरणम्—आदौ भवम् आद्यम् = आदिशब्दात् भवार्थे यत् । वदन्ति = वद् + लट् ।

लक्षणान्तरे यथा—

वसन्ततिलका तभौ जौ गौ । पिङ्गलः ।
ज्ञेयं वसन्ततिलकं तभजा जगौ गः । छन्दोम० ।

यत्र प्रतिपादं तगण-भगणौ-जगणद्वयं गुरुद्वयश्च भवेत् तत् वसन्ततिलका नाम वृत्तिमित्यर्थः ।

उदाहरणं यथा—

हे रोहिणि ! त्वमसि रात्रिकरस्य भार्या
एनं निवारय पतिं सखि ! दुर्विनीतम् ।
जालान्तरेण मम वासगृहं प्रविश्य
श्रोणी तटं स्पृशति किं कुलधर्म एषः ॥

भाषा—जिसमें पाद के द्वितीय, चतुर्थ, अष्टम, एकादश, त्रयोदश चतुर्दश अक्षर गुरु हो और आठ आठ तथा छ छ अक्षरों पर विश्राम हो तो उसको वसन्ततिलका नाम छन्द कहते हैं ॥ ३७ ॥

(३५) मालिनीछन्दः ।

प्रथममगुरुषट्कं विद्यते यत्र कान्ते !
तदनु च दशमं चेदक्षरं द्वादशान्त्यम् ॥
गिरिभिरथ तुरङ्गैर्यत्र कान्ते ! विरामः
सुकविजनमनोज्ञा मालिनी सा प्रसिद्धा ॥३८॥

अन्वयः—हे कान्ते ! हे बाले ! यत्र चेत् प्रथमं षट्कं, तदनु

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitized by eGangotri

दशमं, द्वादशान्त्यं च अक्षरं अगुरु विद्यते अथ यत्र गिरिभिः तुरङ्गैः विरामः (स्यात्) सा सुकविजनमनोज्ञा मालिनी प्रसिद्धा ।

व्याख्या—हे कान्ते कमनीयगात्रि ! हे बाले षोडशवर्षाऽभ्यन्तरवयस्के ! यत्र यस्यां वृत्तौ प्रथमं षट्कं आदितः षडक्षरं तदनु तदनन्तरं दशमं द्वादशान्त्यं त्रयोदशं च अक्षरं अगुरु ह्रस्वं विद्यते वर्तते अथ यत्र यस्यां वृत्तौ गिरिभिरष्टभिः तुरङ्गैः सप्तभिश्चाक्षरैः विरामो विरतिः (स्यात्) सुकविजनमनोज्ञा काव्यज्ञमनोरञ्जिनी सा एषा मालिनी तन्नाम्नी प्रसिद्धा ख्याता अस्तीति शेषः ।

समासः—न गुरु अगुरु । द्वादशस्य अन्त्यं द्वादशान्त्यम् । सुकविजनानां मनोज्ञा सुकविजनमनोज्ञा ।

व्याकरणम्—विद्यते = वित् × श्यन् × लट् ।

लक्षणान्तरे यथा—

मालिनी नौम्यौ यू । पिङ्गलः ।

ननमयययुतेयं मालिनी भोगिलोकैः । छन्दोम० ।

यत्र नगणद्वयं मगण-यगणौ च सन्ति, अष्टभिः सप्तभिश्च विरतिः तत् मालिनी नाम वृत्तमित्यर्थः ।

न० न० म० य० य०

।।। ।।। ऽऽऽ ।ऽऽ ।ऽऽ

उदाहरणं यथा—

असितागिरिसमं स्यात्कज्जलं सिन्धुपात्रे
सुरतरुवरशाखा लेखनो पत्रमुर्वी ।
लिखति यदि गृहीत्वा शारदा सर्वकालं
तदपि तव गुणानामीश ! पारं न याति ।

भाषा—जिसमें पाद के प्रथम से छ अक्षर और दशम त्रयोदश अक्षर ह्रस्व हो और आठ आठ तथा सात सात अक्षरों पर विश्राम हो तो वह मालिनी नाम से प्रसिद्ध होता है ॥ ३८ ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

(३६) हरिणीछन्दः ।

सुमुखि ! लघवः पञ्च प्राच्यास्ततो दशमान्तिकं
तदनु ललितालापे ! वर्णौ यदि त्रिचतुर्दशौ ।
प्रभवति पुनर्यत्रोपान्त्यः स्फुरत्करकङ्कणे !
यतिरपि रसैर्वेदैरश्वैः स्मृता हरिणीति सा ॥३९॥

अन्वयः—हे सुमुखि ! यत्र प्राच्याः पञ्च (वर्णाः) लघवः (स्युः) ततः दशमान्तिकः (वर्णः) लघुः स्यात् हे ललितालापे ! तदनु यदि त्रिचतुर्दशौ (वर्णौ) लघू स्याताम् । हे स्फुरत्करकङ्कणे ! पुनः यत्र उपान्त्यः (वर्णः) लघुः (स्यात्) रसैः वेदैः अश्वैश्च यतिरपि (स्यात्) तदा सा हरिणी इति स्मृता ।

व्याख्या—हे सुमुखि शोभनानने ! यत्र यस्यां वृत्तौ प्राच्याः पञ्च वर्णाः प्रथमतः पञ्चाक्षराणि लघवो ह्रस्वाः (स्युः) ततः तदनन्तरं दशमान्तिकः एकादशो वर्णो लघुः (स्यात्) हे ललितालापे मधुरभाषिणि ! तदनु तत्पश्चात् यदि चेत् त्रिचतुर्दशौ वर्णौ लघू (स्याताम्) हे स्फुरत्करकङ्कणे दीप्यमानहस्तभूषणे ! पुनः यत्र यस्यां वृत्तौ उपान्त्यः षोडशो वर्णो लघु (स्यात्) रसैः षड्भिः वेदैश्चतुर्भिः अश्वैः सप्तभिश्च वर्णैः यति विरामोऽपि स्यात् तदा सा पूर्वोक्तलक्षणलक्षिता हरिणी इति हरिणी नाम्नी स्मृता कथिता बुधैरिति शेषः ।

समासः—सुष्ठु शोभनं मुखं यस्याः सा सुमुखी तत्सम्बुद्धौ हे सुमुखि ! दशमस्य अन्तिको दशमान्तिकः । ललित आलापो यस्याः सा ललितालापा तत्सम्बुद्धौ हे ललितालापे ! त्रयश्च चत्वारश्च त्रिचतुरौ तौ च दश च त्रिचतुर्दशौ । करयोः कङ्कणं करकङ्कणं स्फुरत्करकङ्कणं यस्याः सा स्फुरत्करकङ्कणा तत्सम्बुद्धौ हे स्फुरत्करकङ्कणे!।

व्याकरणम्—प्रभवति = प्र × भू × लट् । स्मृता = स्मृ ×

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

क्तः × टाप ।

लक्षणान्तरे यथा—

हरिणी न्सौ म्रौ गृतुसमुद्र ऋषयः । पिङ्गलः ।
नसमरसलागः षड्वेदै र्हरिणी मता । छन्दोम०

यत्र प्रतिपादं नगण-सगण-मगण-रगण-सगणास्तत एको लघुरेकश्च गुरुस्तथा षड्भिश्चतुर्भिः सप्तभिश्च विरतिश्चेत्तदा तत् हरिणीनाम वृत्तिरित्यर्थः ।

न० स० म० र० स० ल० गु०

।।। ।।ऽ ऽऽऽ ऽ।ऽ ।।ऽ । ऽ

उदाहरणं यथा—

विरमत बुधा योषित्सङ्गात्सुखात्क्षणभङ्गुरात्
कुरुत करुणामैत्रीः प्रज्ञावधूजनसङ्गमम् ।
न खलु नरके हाराक्रान्तं घनस्तनमण्डलं
शरणमथवा श्रोणीबिम्बं रणन्मणिमेखम् ॥

भाषा—जिसमें प्रतिपाद के आदि से पांच अक्षर ह्रस्व हों और एकादश, त्रयोदश, चतुर्दश, षोडश संख्यक अक्षर ह्रस्व हों और छ, चार, सात अक्षरों पर विराम हो वह हरिणी छन्द है ॥ ३९ ॥

(३७) शिखरिणीछन्दः ।

यदा पूर्वो ह्रस्वः कमलनयने ! षष्ठकपरा-
स्ततो वर्णाः पञ्च [illegible] मारङ्गि ! लघवः ॥
त्रयोऽन्ये चोपान्त्याः सुतनु ! जघनाभोगसुभगे !
रसै रुद्रैर्यस्यां भवति विरतिः सा शिखरिणी ॥४०॥

अन्वयः—हे कमलनयने ! यदा पूर्वः (वर्णः) ह्रस्वः (स्यात्) हे प्रकृतिसुकुमाराङ्गि ! ततः षष्ठकपराः पञ्च वर्णाः लघवः (स्युः) हे सुतनु ! अन्ये च उपान्त्याः त्रयः (वर्णाः) लघवः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

(स्युः) हे जघनाभोगसुभगे ! तदा सा शिखरिणी भवति ।

व्याख्या—हे कमलनयने पद्माक्षि ! यदा पूर्वः प्रथमः (वर्णः) ह्रस्वो लघुः स्यात् हे प्रकृतिसुकुमाराङ्गि स्वभावकोमलगात्रि ! ततस्तदनन्तरं षष्ठकपराः षष्ठतः पञ्चसंख्यका वर्णा अक्षराणि हेसुतनु शोभनाङ्गि ! अन्ये च उपान्त्या अन्त्यसमीपवर्तिनः त्रयः त्रिसंख्यका वर्णाः चतुर्दश-पञ्चदश-षोडशाः लघवो ह्रस्वाः स्युः हे जघनाभोगसुभगे विस्तृतजघनशोभाशालिनि यस्यां वृत्तौ रसैः रुद्रैः षड्भिः एकादशभिश्चाक्षरैः विरतिर्विश्रामो भवति वर्तते सा शिखरिणी नाम वृत्तिर्बोध्येति शेषः ।

(समासः) कमले इव नयने यस्याः सा कमलनयना तत्सम्बुद्धौ हे कमलनयने ! षष्ठ एव षष्ठकः तस्मात्पराः षष्ठकपराः । प्रकृत्या सुकुमारं अङ्गं यस्याः सा प्रकृतिसुकुमाराङ्गी तत्सम्बुद्धौ हे प्रकृतिसुकुमाराङ्गि ! । सुष्ठु शोभना तनु र्यस्याः सा सुतनुः तत्सम्बुद्धौ हे सुतनु ! । जघनस्य आभोगः जघनाभोगस्तेन सुभगा जघनाभोगसुभग तत्सम्बुद्धौ हे जघनाभोगसुभगे ।

(व्याकरणम्) उपान्ते भवा उपान्त्याः उपान्तशब्दात् भवार्थे यत् । भवति = भू × लट् ।

लक्षणान्तरे यथा—

शिखरिणी यमौ नसौ म्लौ गुरुद्राः । पिङ्गलः ।

रसै रुद्रै श्छिन्ना यमनसभलागः शिखरिणी । छन्दोम०

यस्य प्रतिपादं यगण मगण नगण सगणयुक्तं तदुत्तरमेको लघुरेको गुरुश्च स्यात् तत् शिखरिणी नाम वृत्तमित्यर्थः ।

य० म० न० स० भ० ल० गु०

⏑ – – ⏑ – – ⏑ – – ⏑ – ⏑ – ⏑ – –

।ऽऽऽ।।।।ऽऽ।। । ऽ

उदाहरणं यथा—

जटा नेयं वेणी कृतकचकलापो न गरलं

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

गले कस्तुरीयं शिरसि शशिरेखा न कुसुमम्।
इयं भूतिर्नाङ्गे प्रियविरहजन्मा धवलिमा
पुरारातिभ्रान्त्या कुसुमशर! मां किं व्यथयसे॥

भाषा—जिसके चारो चरणों में प्रथम सप्तम अष्टम नवम दशम एकादश चतुर्दश पञ्चदश षोडश इतने अक्षर ह्रस्व हों और छ छ तथा ग्यारह ग्यारह अक्षर पर विश्राम हो तो वह शिखरिणी नाम छन्द है॥

(३८) पृथ्वीछन्दः।

द्वितीयमलिकुन्तले! यदि षडष्टमं द्वादशं
चतुर्दशमथ प्रिये! गुरुगभीरनाभिह्रदे!
सपञ्चदशमान्तिकं तदनु यत्र कान्ते! यति-
र्गिरीन्द्रफणिभृत्कुलैर्भवति सुभ्रु! पृथ्वी हि सा॥४१॥

अन्वयः—हे अलिकुन्तले! यदि द्वितीयं षट् अष्टमं द्वादशं चतुर्दशं अथ हे प्रिये! हे गम्भीरनाभिह्रदे! सपञ्चदशं अन्तिकं गुरु भवेत्। तदनु तत्पश्चात् हे कान्ते। यत्र गिरीन्द्रफणिभृत्कुलैः यति र्भवति तदा हे सुभ्रु! सा पृथ्वी इति वृत्ति र्बोध्येति शेषः।

व्याख्या—हे अलिकुन्तले भ्रमरवच्छ्यामचूर्णकुन्तले। यदि यदा द्वितीयं षट् अष्टमं द्वादशं अथ हे प्रिये प्रीतिदात्रि! हे गभीरनाभिह्रदे गम्भीरनाभिकुण्डे! चतुर्दशं सपञ्चदशं पञ्चदशेन सहितं अन्तिकं सप्तदशं अक्षरं गुरु दीर्घं (भवेत्) हे कान्ते कमनीयगात्रि! तदनु तत्पश्चात् गिरीन्द्रफणिभृत्कुलः अष्टभिः नवभिश्चाक्षरै र्यत्र यस्यां वृत्तौ यति र्विश्रामो भवति हेसुभु! सा पृथ्वी तन्नाम्नी वृत्तिः।

समासः—अलिवत्कुन्तलं यस्याः सा अलिकुन्तला अथवा अलयः कुन्तले यस्याः सा अलिकुन्तला तत्सम्बुद्धौ हे अलिकुन्तले नाभिर्ह्रद इव नाभिह्रदः गुरुर्नाभिह्रदो यस्याः सा गुरुगभीरनाभि-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

हृदा तत्सम्बुद्धौ हे गुरुगभीरनाभिहृदे ! गिरीन्द्रश्च फणिभृत्कुलानि च गिरीन्द्रफणिभृत्कुलानि तैः गिरीन्द्रफणिभृत्कुलैः। सुष्ठु शोभनौ भ्रुवौ यस्याः सा सुभ्रूस्तत्सम्बुद्धौ हे सुभ्रु !

व्याकरणम्—भवति = भू × लट्।

लक्षणान्तरं यथा—

जसौ जसयला वसुग्रहयतिश्च पृथ्वी गुरुः। छं०

यस्य प्रतिपादं जगण सगण जगण सगण युक्तं तत एको लघुरेकश्च गुरुः अष्टभिर्नवभिश्च विरामः तत् पृथ्वी नाम वृत्तमित्यर्थः।

ज०	स०	ज०	स०	य०	ल०	गु०
।ऽ।	।।।	।ऽ।	।।ऽ	।ऽऽ	।	ऽ

उदाहरणं यथा—

इतः स्वपिति केशवः कुलमियस्तदीयद्विषाम्
इतश्च शरणार्थिनां शिखरिणां गणाः शेरते।
इतोऽपि वडवानलः सह समस्तसंवर्तकै-
रहो विततमूर्जितं भरसहश्च सिन्धोर्वपुः ॥

भाषा—जिसके प्रति चरण में षष्ठ अष्टम द्वादश चतुर्दश पञ्चदश सप्तदश इतने अक्षर दीर्घ हों और आठ तथा नव अक्षर पर विश्राम हो तो वह पृथ्वी छन्द है ॥ ४१ ॥

(३६) शार्दूलविक्रीडितं छन्दः।

आद्याश्चेद्गुरवस्त्रयः प्रियतमे षष्ठस्तथा चाष्टमो
नन्वेकादशतस्त्रयस्तदनु चेदष्टादशाद्यौ ततः ॥
मार्तण्डैर्मुनिभिश्च यत्र विरतिः पूर्णेन्दुबिम्बानने !
तद्वृत्तं प्रवदन्ति काव्यरसिकाः शार्दूलविक्रीडितम् ४२

(अन्वयः) हे प्रियतमे ! चेत् आद्याः त्रयः गुरवः (स्युः)

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तथा षष्ठः अष्टमश्च गुरुः स्यात् ननु एकादशतः त्रयः अपि गुरवः, तदनु चेत् अष्टादशाद्यौ गुरु (स्याताम्) ततः हे पूर्णेन्दुबिम्बानने ! यत्र मार्तण्डैः मुनिभिः च विरतिः (स्यात्) तत् काव्यरसिकाः शार्दूलविक्रीडितं वृत्तं प्रवदन्ति ।

व्याख्या—हे प्रियतमे ! चेत् यदि आद्याः प्रथमाः त्रयः त्रिसंख्यका वर्णा गुरवो दीर्घाः स्युः तथा षष्ठः अष्टमश्च वर्णो गुरुः स्यात् ननु निश्चयेन एकादशतः त्रयः द्वादशत्रयोदश–चतुर्दशाः वर्णा गुरवः, तदनु तदनन्तरं चेत् यदि अष्टादशाद्यौ षोडशसप्तदशौ गुरू स्याताम् ततः तदन्तरं हे पूर्णेन्दुबिम्बानने पूर्णचन्द्रमुखि ! यत्र यस्यां वृत्तौ मार्तण्डैः सूर्यैः द्वादशभिः मुनिभिः सप्तभिश्चाक्षरैः विरति विरामः स्यात् काव्यरसिकाः काव्यविदः तत् शार्दूलविक्रीडितं वृत्तं प्रवदन्ति कथयन्ति ।

समासः—अष्टादशस्य आद्यौ अष्टादशाद्यौ । पूर्णेश्वासाविन्दुः पूर्णेन्दुस्तस्य विम्ववदाननं यस्याः सा पूर्णेन्दुबिम्बानाना तत्सम्बुद्धौ हे पूर्णेन्दुबिम्बानने ! काव्ये रसिका काव्यरसिकाः ।

व्याकरणम्—प्रवदन्ति = प्र × वद् × लट् ।

लक्षणान्तरे यथा—

शार्दूलविक्रीडितं म्सौ ज्सौ तौ गादित्य ऋषयः । पिङ्गलः ।
सूर्याश्वैर्मसजस्ततासगुरवःशार्दूलविक्रीडितम्।छन्दोमञ्जरी ।

यस्य प्रतिपादं मगण सगण जगण सगणैः तगणद्वयेन च युक्तं तत एको गुरु र्भवति तत् शार्दूलविक्रीडितं वृत्तमित्यर्थः।

म०	स०	ज०	स० त०	त०	गु०
SSS	।।S	।S।	।।S SS।	SS।	S

उदाहरणं यथा—

उद्यानेषु विचित्रभोजनविधिस्तीव्रातितीव्रं तपः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

कौपीनावरणं सुवस्त्रममितं भिक्षाटनं मण्डनम् ।
आसन्नं मरणञ्च मङ्गलसमं यस्यां समुत्पद्यते
तां काशीं परिहृत्य हन्त बिबुधैरन्यत्र किं स्थीयते ॥

भाषा—जिसमें चरणों के प्रथम से तीन अक्षर और षष्ठ, अष्टम, द्वादश, त्रयोदश, चतुर्दश, षोडश, सप्तदश, इतने अक्षर भी दीर्घ हो बारह २ सात २ अक्षरों पर विश्राम हो तो उसको शार्दूलविक्रीडित छन्द कहते हैं ॥ ४२ ॥

(४०) स्रग्धरा वृत्तम् ।

चत्वारो यत्र वर्णाः प्रथममलघवः
षष्ठकः सप्तमोऽपि द्वौ तद्व-
त्षोडशाद्यौ मृगमदमुदिते !
षोडशान्त्यौ तथान्त्यौ । रम्भा-
स्तम्भोरुकान्ते ! मुनिमुनिमुनि-
भिर्दृश्यते चोद्विरामो बाले !
वन्द्यैः कवीन्द्रैः सुतनु !
निगदिता स्रग्धरा सा प्रसिद्धा ॥ ४३ ॥

अन्वयः—हे मृगमदमुदिते ! यत्र प्रथमं चत्वारो वर्णा अलघवः (स्युः) (तथा) षष्ठकः सप्तमः अपि अलघुः (स्यात्) हे रम्भास्तम्भोरुकान्ते ? तद्वत् षोडशाद्यौ द्वौ षोडशान्त्यौ अन्त्यौ च (गुरू स्याताम्) हे बाले मुनि-मुनि-मुनिभिः विरामश्चेत् दृश्यते तदा हे सुतनु ? वन्द्यैः कवीन्द्रैः प्रसिद्धा सा स्रग्धरा निगदिता ।

व्याख्या—हे मृगमदमुदिते कस्तूरीचर्चिताङ्गि ? यत्र यस्यां वृत्तौ प्रथमं चत्वारः वर्णाः प्रथमतो वर्णचतुष्टयं अलघवः दीर्घाः (स्युः) (तथा) षष्ठकः—सप्तमोऽपि वर्णः अलघुः (दीर्घः)

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

स्यात्। हेरम्भास्तम्भोरुकान्ते! कदलीस्तम्भारुद्युते! तद्वत् तथैव षोडशाद्यौ षोडशाक्षरस्यादिभूतौ चतुर्दश-पञ्चदशौ (तथा) षोडशान्त्यौ षोडशाक्षरस्याऽन्त्यभूतौ सप्तदशाष्टादशौ (तथा) अन्त्यौ पादान्तभूतौ विंशत्येकविंशती। हेबाले षोडशवर्षाभ्यन्तरवयस्के! मनि-मुनि-मुनिभिः सप्तभिः सप्तभिश्च वर्णैः विरामो विरतिः दृश्यते विलोक्यते तदा हेसुतनु शोभनशरीरे! वन्द्यैः स्तुत्यैः कवीन्द्रैः कविश्रेष्ठैः प्रसिद्धा विख्याता स्रग्धरा तन्नाम्नी वृत्तिः निगदिता कथिता।

समासः—न लघवोऽलघवः! षोडशस्य आद्यौ षोडशाद्यौ। मृगस्य मदो मृगमदस्तेन मुदिता मृगमदमुदिता तत्सम्बुद्धौ हे मृगमदमुदिते! षोडशस्य अन्त्यौ षोडशान्त्यौ। रम्भायास्तम्भः रम्भास्तम्भः ऊर्वोः कान्तिः ऊरुकान्तिः रम्भास्तम्भवत् ऊरुकान्तिर्यस्याः सा रम्भास्तम्भोरुकान्तिस्तत्सम्बुद्धौ हेरम्भास्तम्भोरुकान्ते! कवीनामिन्द्राः कवीन्द्रास्तैः कवीन्द्रैः। सुष्ठु तनुर्यस्याः सा सुतनुः तत्सम्बुद्धौ हे सुतनु!

व्याकरणम्—वन्द्यैः=वदि × क्यप्। निगदिता=नि × गद् × क्तः × टाप्।

लक्षणान्तरे यथा—

स्रग्धरा म्रौ भ्नौ यौ य् त्रिः सप्तकाः। पिङ्गलः।
भ्रम्नैर्याणां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्त्तितेयम्।

छन्दोमञ्जरी

यत्र प्रतिपादं मगण-रगण-भगण-नगणाः यगणत्रयं च सन्ति सप्तभिरक्षरैर्विरतिश्च सा स्रग्धरा नाम वृत्तिरित्यर्थः।

म०	र०	भ०	न०	य०	य०	य०
~~	~ ~	~ ~	~ ~	~ ~	~ ~	~ ~
SSS।	SS।	S॥	॥	S॥	S॥	॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

उदाहरणं यथा--

आयुः कल्लोललोलं कतिपयदिवसस्थायिनी यौवनश्री-
रर्थाः संकल्पकल्पाः घनसमयतडिद्वासनाभोगपूराः ।
कण्ठाश्लेषोऽपि गूढं तदपि च न चिरं यत्प्रियाभिः प्रणीतं
ब्रह्मण्यासक्तचित्ता भवत भवभयाम्भोधिपारं तरीतुम् ॥

भाषा—जिसमें चरण के प्रथम चार अक्षर तथा षष्ठ, सप्तम, चतुर्दश, पञ्चदश, सप्तदश, अष्टादश, भी अक्षर दीर्घ हो और सात सात अक्षरों पर विराम हो तो वह स्रग्धरा नाम वृत्ति कही गई है ॥ ४३ ॥

इति ठक्कुरोपाह्व श्रीकनकलालशर्म्मणा (मैथिलेन) विरचितया
परीक्षोपयोगिन्या विमलाख्यया संस्कृतव्याख्यया भाषया च
समलंकृतो महाकवि श्रीकालिदासविरचितः श्रुत-
बोधश्छन्दो ग्रन्थः समाप्तः ।

मुद्रकः—विद्याविलास प्रेस, बनारस । १९४७ २.....

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

गणनामदेवताफलानि

मो भूमि श्रियमातनोति य जलं वृद्धिं र चाग्निर्मृतिं
सो वायुः परदेशदूरगमनं त व्योम शून्यं फलम् ।
जः सूर्यो रुजमाददाति विपुलं भेन्दुर्यशो निर्मलं
नो नाकश्च सुखप्रदः फलमिदं प्राहुर्गणानां बुधाः ॥१॥

व्याख्या—म इति ॥ मो मगणः भूमि भूमिदेवताकः श्रियमातनोति लक्ष्मीरूपफलं ददाति । य यगणो जलं जलदेवताकः, वृद्धिं वृद्धिरूपफलं ददाति । रो रगणोऽग्निः, अग्निदेवताकः, मृति मरणरूपफलं ददाति । सः सगणो वायु र्वायुदेवताकः, परदेशदूरगमनमुक्तरूपफलं ददाति । त तगणो व्योम व्योमदेवताकः, शून्यं फलम् आददाति जो जगणः सूर्यः सूर्यदेवताको रुजं रोगफलं ददाति । भगण इन्दुश्चन्द्रदेवताकः, बिपुलं बहुलं निर्मलं प्रशस्तं यशः कीर्तिं ददाति । नो नगणो नाकः स्वर्गदेवताकः, सुखप्रदः सुखरूपं फलं ददाति । बुधाः पण्डिता गणानां मगणादीनामिदं फलं प्राहुः कथयन्ति ॥ १ ॥

भाषा—मगणका देवता भूमि है वह लक्ष्मी का विस्तार करता है, यगणकी देवता जल है वह वायु देता है, रगणकी देवता अग्नि है वह दाह देता है, सगणकी देवता वायु है वह परदेश वा दूरगमन करता है, तगणको देवता आकाश है और शून्य फल है, जगणकी देवता सूर्य है, वह रोग देता है, भगणकी देवता चन्द्रमा है, वह निर्मल यश देता है, नगणकी देवता स्वर्ग है, वह सुख देता है' इस उक्त प्रकारसे पण्डित लोग गणों का फल वर्णन करते हैं ॥ १ ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

संख्यागणनामरूपदेवताफलमित्रादिशुभाशुभज्ञापकयन्त्रम् ।

सं०	गणनाम	रूपम्	देवता	फलम्	मित्रादि	शुभाशुभे
१	मगणः	SSS	मही	लक्ष्मीः	मित्रम्	शुभम्
२	यगणः	।SS	जलम्	आयुः	दासः	शुभम्
३	रगणः	S।S	अग्निः	दाहः	शत्रुः	अशुभम्
४	सगणः	।।S	वायुः	विदेशः	शत्रुः	अशुभम्
५	तगणः	SS।	नभः	शून्यम्	उदासः	समम्
६	जगणः	।S।	रविः	रोगः	उदासः	अशुभम्
७	भगणः	S।।	शशी	यशः	दासः	शुभम्
८	नगणः	।।।	स्वर्गं	बुद्धिः	मित्रम्	शुभम्

प्राप्तिस्थानम्—
चौखम्बा-संस्कृत-पुस्तकालय,
विद्याविलास प्रेस, बनारस ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

लघुशब्देन्दुकला

[लघुशब्देन्दुशेखर प्रश्नोत्तरी]

इसमें परीक्षामें आने योग्य सभी प्रश्नोंके उत्तर ऐसे सरल तथा निर्दुष्ट परिष्कारों से युक्त लिखे गये हैं कि अभ्यास करलेने पर विद्यार्थी परीक्षामें पूरी सफलता प्राप्त कर लेगें तथा ग्रन्थ लगाने में भी विद्यार्थीको अत्यधिक सहायता मिलेगी। ऐसा प्रशंसनीय संस्करण यह प्रथम बार ही प्रकाशित हुआ है। १।)

श्रीकोषः।

[अभिनव परिवर्द्धित संस्करण]

याद रखिये इसी "श्रीकोश" के द्वारा आपको एक शब्दके कई अर्थ एवं पर्याय पर्यायरूपेण मिल सकेंगे। इसमें लिङ्ग क्रिया, क्रियाविशेषण, संज्ञा, भाव वाचकसंज्ञा, आदि का निर्देश समुचित रूपसे दिया गया है। एक्सरे, कुर्सी, टेबुल, आलमारी, ब्रु, म्युनिसिपलिटी, कचहरी, जज, कोतवाल, थानेदार, आदि वर्तमान चलते-फिरते शब्दों की ओर (जिनकी संस्कृत बनाने में आप लोगोंको कठिनाई पड़ती थी) तृ० संस्करण में और भी विशेष ध्यान दिया गया है १।)

रूपचन्द्रिका

[अभिनव परिवर्द्धित द्वितीय संस्करण]

इस संस्करण में 'लघुकौमुदी' में आये हुए सभी शब्दों तथा धातुओं के रूप देकर तत्समानाकार अन्य प्रसिद्ध शब्दों और धातुओं के भी बहुत से रूप दिये गये हैं एवं सभी धातुओंके सेट, अनिट, सकर्मक, अकर्मक आदि का भी निर्देश कर दिया गया है। प्रथमा परीक्षार्थियों के लिये बड़ी उपादेय पुस्तक है २)

प्राप्तिस्थानम्-चौखम्बा संस्कृत पुस्तकालय, बनारस। २...

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

प्रथम-परीक्षोपयोगि-ग्रन्थाः—

१ लघुकौमुदी। परीक्षोपयोगी 'बालबोधिनी' टीका सहित ।।।=)

२ रूपचन्द्रिका। लघुकौमुदी के सभी शब्द तथा धातुओं के अर्थ सहित रूप २)

३ लघुकौमुदी-प्रयोग सूची। ।)

४ किरात-घण्टापथ-सुधाव्याख्याद्वयोपेत १-३ सर्ग १।।)

५ पञ्चतन्त्र (अ० कारक) सुबोधिनी सं० हिन्दी टीका।।।)

६ श्रीकोश-अनुवाद का सर्वोत्तम ग्रन्थ १)

७ अमरकोश। मूल प्रथमकाण्ड -)॥

८ अमरकोश। मणिप्रभा भा० टी० प्रथमकाण्ड ॥)

९ अमरकोश-संपूर्ण 'मणिप्रभा' भाषा टीका ४)

१० मूलरामायण। 'सुधा' सं० हि० टीका सहित ।=)

११ रघुवंश-मल्लिनाथी-सुधाव्याख्याद्वयोपेत २-५ सर्ग २)

१२ गणितकौमुदी प्र० भाग (चतुर्थसंस्करण) ।।।)

१३ संस्कृतरचनानुवादशिक्षक प्र०परीक्षोपयोगी १)

१४ कौमुदीरूपलता। (३६७ शब्दों की रूपावली) १।)

१५ हितोपदेश-मित्रलाभ-सं०हि० टीका द्वयोपेत १।=)

१६ तर्कसंग्रह-न्यायबोधिनी-पदकृत्य-विरला संस्कृत टीका इन्दुमती नामक बृहत् भा० टी० सहित १)

१७ प्रथमा-सोत्तरा-प्रश्नावली-नूतन संस्करण १।।।)

प्राप्तिस्थानम्—

चौखम्बा-संस्कृत-पुस्तकालय,

विद्याविलास प्रेस, बनारस।

Kirtikant Sharma Collection, Najafgarh